दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लपूर्णिमा
मार्गशीर्ष ०१ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-14 ■ वर्ष-6 ■ अङ्क-28 | 1 | नवम्बर 24, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 शताब्दी-मैत्री-शृङ्खलायां भारतस्य ऐतिहासिकः विजयः, न्यूज़ीलैण्ड-देशं १-० इति अन्तरेण पराजितम्

4 विधानसभाध्यक्षः कुलदीपसिंहपठानिया IGMC- चिकित्सालये प्रवेशितः, शीतकालीन-सत्रकाले अस्वस्थता अभवत्

8 बिहारराज्यस्य ८९९ राजस्वन्यायालयेषु अन्तर्जालमाध्यमेन श्रवणव्यवस्थायाः शुभारम्भः, भूमिविवादनिराकरणे पारदर्शितायाः सुगमतायाश्च सम्भावना

भारत-नेपालयोः मध्ये जलविद्युत्-स्वास्थ्य-आधारभूत संरचना-प्रमुख-परियोजनासु अष्टौ संधि-ज्ञापनानि हस्ताक्षरितानि



अयोध्याधाम-जनकपुरधाम-नगरयोः संयोजिका 'सरयू-कमला'-रेलयान-सेवा हरित-पताका-प्रदर्शनेन समुद्घाटिता

भारत-नेपालयोः मध्ये विविधक्षेत्रेषु सहयोगाय अष्टसन्धिपत्राणि हस्ताक्षरितानि। एतेषु सन्धिपत्रेषु स्वास्थ्यं, पारम्परिकचिकित्सा, उपग्रहसञ्चारजालस्य स्थापना, सामर्थ्यवर्धनप्रशिक्षणकार्यक्रमः, सततनगरविकासः, शिक्षानुसन्धानम्, पशुधनविकासः मत्स्यपालनविकासः चेत्येते विषयाः सम्मिलिताः सन्ति। नवदिल्ल्यां प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेपालस्य प्रधानमन्त्रिणः बालेन्द्रशाहस्य च मध्ये जातायाः चर्चायाः अनन्तरम् एतेषु सन्धिपत्रेषु हस्ताक्षराणि जातानि । वार्ताहरसम्मेलने श्रीमोदी अवदत् यत् भारत-नेपालयोः सम्बन्धाः समान-इतिहासेन, श्रद्धया, संस्कृत्या तथा जनानां परस्परसम्बन्धैः सुदृढाः सन्ति ।

भारतसर्वकारेण नेपालाय चतुर्विंशतिसहस्र कोटि-नेपाली-रूप्यकाणां विकास-सङ्कल्पः घोषितः

अस्मिन् वर्षे अगस्तमासे नेपालदेशे जलाप्लावन-कारणेन जनहानिं प्रति असौ शोकं प्रकटितवान्। नेपालस्य पुनर्निर्माणाय दीर्घकालीनविकासाय च नवोत्साहं प्रदातुं प्रधानमन्त्री नेपालस्य चतुर्विंशतिसहस्रकोटि-रुप्यकाणां विकाससहयोग-पुटकस्य घोषणाम् अकरोत्।

नेपाल-प्रधानमन्त्री बालेन्द्रशाहः राष्ट्रपति भवने महामहिम-राष्ट्रपतिपदासीनया द्रौपदी-मुर्मू-महोदयया सह सौहार्द-मेलनम् अकरोत्। सामाजिक-सञ्चार-माध्यमे स्वकीय-सन्देशे राष्ट्रपतिः मुर्मू प्रतिपादितवती यत् द्वयोः राष्ट्रयोः अद्वितीय-बहुमुखी-मैत्री-सम्बन्धानां दृढा आधारशिला समान-सभ्यता-परम्परायां जन-मनोमध्ये विद्यमानेषु प्रगाढ स्नेह-बन्धनेषु च प्रतिष्ठिता अस्ति।

भारत-नेपालयोः मध्ये रेलसेवा प्रारब्धा।

प्रधानमन्त्री नरेन्द्रमोदी तथा नेपालस्य प्रधानमन्त्री बालेन्द्रशाहः नवदिल्लीतः दृश्यश्रव्य-परान्तर्जालीय-माध्यमेन उत्तरप्रदेशस्य अयोध्यां नेपालस्य जनकपुरधाम्ना सह संयोजयन्त्याः नूतन-साप्ताहिक-रेलसेवायाः 'सरयू-कमला-एक्सप्रेस्' इत्यस्याः संयुक्तरूपेण शुभारम्भम् अकुरुताम्। इयं नियमिता साप्ताहिकी रेलसेवा उत्तरप्रदेशस्य बिहारस्य च प्रमुखनगराणि अतिक्रम्य चतुरधिक-षड्शत-किलोमीटर्-मिता यावत् वर्तते। 'सरयू-कमला-एक्सप्रेस्' इति सप्ताहे एकवारं प्रचलिष्यति। अस्याः यात्रा अयोध्या-कैंट इत्यतः सोमवासरे तथा जनकपुरधाम्नः शनिवासरे प्रारप्स्यते। प्राप्तवार्तानुसारम् इयं रेलसेवा सीमापारसम्पर्क, धार्मिकपर्यटनं तथा भारत-नेपालयोः मैत्रीसम्बन्धं च सुदृढीकर्तुं भारतीयरेलस्य महत्त्वपूर्णः पदक्षेपः अस्ति।

नवदेहल्यां स्वास्थ्य-सामाजिक-क्षेत्राणां विशेषज्ञैः सह दशमं पूर्व-आयव्ययक-परामर्श संचालितवती वित्तमंत्री

आगामि वर्षस्य केन्द्रीय-आयव्ययकं पुरस्कृत्य वित्त-मन्त्री निर्मला सीतारामणः नवदेहल्यां स्वास्थ्य-सामाजिक-क्षेत्राणां विशेषज्ञैः सह दशमं पूर्व-आयव्ययक-परामर्श संचालितवती। अत्र आर्थिक-कार्य-विभागस्य जनजातीय कार्य-मन्त्रालयस्य च सचिवाः, स्वास्थ्य-परिवार-कल्याण-मन्त्रालयस्य वरिष्ठ अधिकारिणः, मुख्य-आर्थिक परामर्शकः डॉ. वि. अनन्त-नागेश्वरश्च समुपस्थिताः आसन्।

सुभाषितम्

आदौ तन्वो बृहन्मध्या विस्तारिण्यः पदे पदे।।
यायिन्यो न निवर्तन्ते सतां मैत्र्यः सरित्समा।।

भावार्थः- सज्जन और विद्वान् व्यक्तियों से मित्रता एक सरिता (नदी) के समान होती है जो कि प्रारम्भ में एक तनु शरीर वाली और मध्यावस्था में हृष्ट पुष्ट तथा आकार में सतत वृद्धि प्राप्त करने वाली और सदैव आगे बढते हुए कभी नहीं रुकती है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
कार्यालयीयः सम्पर्कः- शिवानी शर्मा 7876636263

सूचना- हिमसंस्कृतवार्तायां दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकमण्डलः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्राणा, प्रचारमण्डलः- जगदीश डाभी गुजरातम्, वृजेश कुमार पाण्डेयः, उ.प्र, सत्येन्द्रपाठकः उ.प्र, डा.विमलेश झा बिहारम्, डा.राधवनाथ झा बिहारम्, डॉ.पद्मनाभः हिमाचलम्, डा.निशिकान्त पाण्डेयः प.बंगाल, नवीन ममगाईं उत्तराखण्ड, कुलदीप मैन्दोला उत्तराखण्ड, डा.नवीनशर्मा हरियाणा, अजय कुमार आर्य पंजाब, ईशान तिवारी दिल्ली, रवि खरडिहालः कर्नाटक, डॉ.वर्षा टोणगांवकरः, सुधा साळवे महाराष्ट्रम्, ईदर धीरजः आन्ध्रप्रदेशः, नारद उपाध्यायः, डा.नयन ज्योति शर्मा असम

गृहमन्त्रालयेन 'व्हाट्सएप्'-उपयोक्तृभ्यः जाल-माध्यमे 'व्हाट्सएप्'-प्रयोगे सावधानता-ग्रहणाय परामर्शः दत्तः



गृहमन्त्रालयेन 'व्हाट्सएप्'-उपयोक्तृभ्यः जाल-माध्यमे 'व्हाट्सएप्'-प्रयोगे सावधानता-ग्रहणाय परामर्शः दत्तः। एकस्मिन् परामर्श भारतीय-साइबर अपराध-समन्वय-केन्द्रेण उक्तं यत् तस्य राष्ट्रिय-साइबर अपराध-सङ्कट-विश्लेषण-विभागेन दृष्टं यत् प्रमाणीकृत-जाल-सत्रस्य दुरुपयोगेन उपयोक्तुः व्हाट्सएप् इत्यत्र अनधिकृत-प्रवेशः कर्तुं शक्यते। परामर्शानुसारम् एषः अनधिकृत-प्रवेशः दुष्ट-व्यक्तिभ्यः सन्देश-पठनस्य उपयोक्तृ-वेशे सन्देश-प्रेषणस्य च अवसरं ददाति। अनेन सम्पर्क-सूचीनां समूह-संवादानाञ्च प्राप्तिः भवति तथा वञ्चना-छद्म-प्रलोभन-सामाजिक-अभि-यान्त्रिकी-अन्य-दुष्कृत्येषु जनस्य विश्वसनीय-परिचयस्य दुरुपयोगः अपि भवितुम् अर्हति।

गोवा-नगरे सप्तपञ्चाशत्तम-भारतीय-अन्ताराष्ट्रिय चलचित्र-महोत्सवस्य चतुर्थे दिवसे शान्ति-करुणा-अन्तरसांस्कृतिक-समन्वय-भावप्रधानानां चलच्चित्राणां वैविध्यपूर्णः उत्सवः समनुष्ठीतः



गोवा-नगरे सप्तपञ्चाशत्तम-भारतीय-अन्ताराष्ट्रिय चलचित्र-महोत्सवस्य चतुर्थे दिवसे शान्ति-करुणा-अन्तरसांस्कृतिक-समन्वय-भावप्रधानानां चलच्चित्राणां वैविध्यपूर्णः उत्सवः समनुष्ठीयते। अद्यतन-समारोहस्य मुख्य-वैशिष्ट्यं गौरवमयस्य 'आई.सी.एफ्.टी. - यूनेस्को गान्धी-पदकस्य' स्पर्धा वर्तते, यस्यां दश भारतीय-वैदेशिक-कथाचित्राणि पुरस्काराय स्पर्धन्ते। अत्र सप्त-अन्ताराष्ट्रिय-प्रविष्टिभिः सह 'कबीर-सर-का-आखिरी-लेसन', 'स्क्रॉल', 'सेव-मिक्चर' इति त्रीणि भारतीय-चलच्चित्राणि अपि समाविष्टानि सन्ति ।

समग्र-शासन-दृष्ट्या भारतेन पञ्चाशत्-कोटि-जनाः घोर-दारिद्र्यात् समुद्धृता - शिवराजसिंह-चौहानः



समग्र-शासन-दृष्ट्या भारतेन पञ्चाशत्-कोटि-जनाः घोर-दारिद्र्यात् समुद्धृता इति कृषि मन्त्री शिवराज-सिंह-चौहानः उक्तवान्। नवदिल्ल्यां दारिद्र्य-न्यूनीकरणे कृषेः भूमिका-विषयक-कार्यशालां सम्बोधयन् असौ प्रोक्तवान् यत् अस्मिन् साफल्ये कृषि क्षेत्रं महतीं भूमिकां निर्वहति।

इण्डोनेशिया-देशस्य बन्तेन-प्रान्तस्थ-मिष्टान्न-उद्योगशालायां भीषण-अग्निप्रकोपे चतुर्विंशतिजनाः मृत्युमुपगताः



इण्डोनेशिया-देशस्य बन्तेन प्रान्ते स्थिते एकस्मिन् बृहत्-मिष्टान्न-निर्माणशालायाम् उत्पन्न-भीषण अग्निकाण्डे चतुर्विंशतिः जनाः मृत्युमुपगताः इति वृत्तं प्राप्तम् अस्ति। अयं भीषणः अग्निः गत-शनिवारस्य अपराह्णे प्रादुर्भूतः। अन्वेषण-अभियानस्य निरन्तरं प्रचलन-मध्ये प्रायः त्रिंशत् जनाः अद्यापि लुप्ताः सन्ति। आरक्षक-विभागः अवशेषाणां परिचयार्थं डी.एन्.ए.-प्रतिदर्शनानि, व्यक्तिगत-वस्तूनि, न्यायिक-विज्ञान-दलानि च उपयुक्ते; अस्याः प्रक्रियायाः पूर्णतायां सप्ताहद्वयात् सप्ताहत्रयं यावत् समयः अपेक्षितः अस्ति। अधिकारिणः अग्निकाण्डस्य कारणं ज्ञातुं इदानीमपि अन्वेषणं कुर्वन्तः सन्ति।

शताब्दी-मैत्री-शृङ्खलायां भारतस्य ऐतिहासिकः विजयः, न्यूज़ीलैण्ड-देशं १-० इति अन्तरेण पराजितम्



ऑकलैण्ड् / नवदेहली। पुरुष-हॉकी-क्रीडायां भारतीय-दलेन स्वकीयं श्रेष्ठं प्रदर्शनं निरन्तरं कुर्वता 'भारत-न्यूज़ीलैण्ड शताब्दी क्रीडामैत्री २०२६' इति त्रि-क्रीडात्मक-शृङ्खला १-० इति अन्तरेण विजिता। ऑकलैण्ड्-नगरस्य 'लॉयड एल्समोर हॉकी स्टेडियम' इत्यत्र क्रीडितः अस्य प्रवासस्य तृतीयः अन्तिमश्च प्रतिस्पर्धात्मकः क्रीडा-संग्रामः द्वयोः-द्वयोः (२-२) गोलयोः समानतायां समाप्तः अभवत्। अनेन सहैव भारतीय-दलेन अस्मिन् ऐतिहासिके शृङ्खला-विजये स्वकीया अजेया स्थितिः सुरक्षिता कृता।

शृङ्खलायाः रोमाञ्चकः घटनाक्रमः अस्यां त्रि-क्रीडात्मक-शृङ्खलायां द्वयोः अपि देशयोः दलैः अत्यन्तं कौशलपूर्णस्य आक्रामकस्य च क्रीडायाः प्रदर्शनं कृतम्। शृङ्खलायाः प्रथमे संग्रामे भारतीय-दलेन उत्कृष्टं समन्वयं प्रदर्शयता ३-२ इति अन्तरेण विजयः प्राप्तः आसीत्। ततः परं द्वितीयः क्रीडा-संग्रामः अपि अत्यन्तं संघर्षपूर्णः आसीत्, यः द्वयोः-द्वयोः (२-२) गोलयोः समानतायां समाप्तः। तृतीये अन्तिमे च संग्रामे उभयदलयोः क्रीडकाः विजयाय पूर्णशक्त्या प्रयासं कृतवन्तः, परन्तु निर्धारितसमयान्ते स्कोरः २-२ इति समानः एव अतिष्ठत्। फलतः प्रथम-क्रीडायाः विजयस्य आधारेण भारतं १-० इति अन्तरेण शृङ्खला-विजेता घोषितम्।

क्रीडासम्बन्धस्य गौरवशाली शताब्दी-इतिहासः इयं विशेष-शृङ्खला भारत-न्यूज़ीलैण्ड-देशयोः मध्ये द्विपक्षीय-क्रीडासम्बन्धानां शतवर्षपूर्तेः ऐतिहासिक-अवसरे आयोजिता आसीत्। उल्लेखनीयं वर्तते यत् उभयोः देशयोः मध्ये क्रीडासम्बन्धानां शुभारम्भः अद्यतः शतवर्षपूर्वं १९२६ तमे वर्षे अभवत्। तस्मिन् काले हॉकी-क्रीडायाः जादूगरः इति प्रसिद्धस्य महान-क्रीडकस्य **मेजर ध्यानचन्दस्य** नेतृत्वे भारतीय-सेनायाः हॉकी-दलं प्रथमवारं न्यूज़ीलैण्ड-देशस्य प्रवासाय गतम् आसीत्।

तस्य ऐतिहासिक-प्रवासस्य स्मृतिं जीवन्तीं कर्तुं तथा च द्विपक्षीय-मैत्रीं अधिकं सुदृढां कर्तुम् अस्य 'शताब्दी-महोत्सवस्य' आयोजनं कृतम्। भारतीय-हॉकी-दलस्य अयं विजयः न केवलं वर्तमान-क्रीडकानां कृते उत्साहवर्धकः अस्ति, अपितु मेजर ध्यानचन्दस्य गौरवशालिनः परम्परायाः कृते एका सच्ची श्रद्धांजलिः अपि अस्ति।

भारतर्तुविज्ञानविभागेन आगामिषु पञ्चदिवसेषु तमिलनाडु-पुडुचेरी-कराईकल चेत्येषु स्थलेषु प्रचण्डवृष्टेः सम्भावना व्यक्तीकृतास्ति

भारतर्तुविज्ञानविभागेन आगामिषु पञ्चदिवसेषु तमिलनाडु-पुडुचेरी-कराईकल चेत्येषु स्थलेषु प्रचण्डवृष्टेः सम्भावना व्यक्तीकृतास्ति। विभागानुसारम्, आन्ध्रप्रदेशे अथ अण्डमान-निकोबार-द्वीपसमूहे च मेघगर्जनेन, विद्युत्पातेन तथा प्रबलवातेन सह वृष्टेः सम्भावना अस्ति।



ऋतुविभागेन बिहार-पूर्वोत्तरप्रदेश-झारखण्ड-नागालैण्ड-मणिपुर-मिजोरम-त्रिपुरा-ओडिशाराज्येषु अतिनीहारस्य सम्भावना अपि पूर्वानुमानिता अस्ति।



श्रीगुरुनानकजयन्ती - प्रकाशपर्वः

24 नवम्बर 2026, मङ्गलवासरः

कार्तिकपूर्णिमायां तिथौ आचर्यते। अस्मिन् वर्षे 557तमं प्रकाशपर्व अस्ति।पूर्णिमातिथिः -
आरम्भः- 23 नवम्बर रात्रौ 11:42 वादने
समाप्तिः- 24 नवम्बर रात्रौ 8:23 वादने

श्रीगुरुनानकदेवः कः आसीत् -

सिक्खधर्मस्य संस्थापकः प्रथमगुरुश्च
जन्म- 1469 तमे वर्षे रायभोई-तलवण्ड्यां, यत् अधुना ननकानासाहिबम् (पाकिस्तान) इति कथ्यते
सः एकेश्वरस्य, समानतायाः, सत्यस्य मानवसेवायाश्च सन्देशं दत्तवान्।

तस्य प्रमुखाः उपदेशाः-

1. नाम जपो- ईश्वरस्य नाम स्मर
2. किरत करो- परिश्रमेण उपार्जनं कुरु
3. वंड छको- मिलित्वा भुङ्क्ष्व, आवश्यकजनानां सेवां कुरु।कथम् आचर्यते-

गुरुद्वारेषु अखण्डपाठः, कीर्तनं, कथा च।
प्रातः प्रभातफेरी नगरकीर्तनञ्च।
लङ्गरम्- सर्वे एकत्र उपविश्य भोजनं कुर्वन्ति।
गुरुद्वारेषु दीपमाला अलङ्कारश्च।
श्रीगुरुनानकजयन्त्याः हार्दिकाः शुभकामनाः।
श्रीगुरुनानकदेवस्य प्रकाशपर्वणि सर्वेषां जीवने सुखं, शान्तिः समृद्धिश्च भवतु।
वाहे गुरु जी का खालसा, वाहे गुरु जी की फतेह

आचार्य अरविन्द चुबाडी जिला चम्बा 9816799579

अंशविपणिसमाचारः
भारतीयांशविपण्यां तीव्रः ह्रासः
निवेशकानां सम्पत्तौ पञ्चलक्षकोटि-
रूप्यकाणामधिकं हानिः

हिमसंस्कृतवार्ताः- डॉ विमलेश झा, मुंबई

सोमवासरे भारतीयांशविपण्यां तीव्रः पतनः अभवत्। अस्मिन् दिने मुम्बईशेयरविपण्याः प्रमुखसूचकाङ्कः सेन्सेक्सः प्रायः १,४८३.७२ अङ्कैः पतित्वा ८२,४३५.९९ अङ्कानां समीपे समाप्तः। तथैव राष्ट्रियशेयरविपण्याः प्रमुखसूचकाङ्कः निफ्टी अपि प्रायः ४५०.९५ अङ्कैः अवनम्य २५,३४९.६५ अङ्कानां समीपे स्थितः। उल्लेखनीयमस्ति यत् चतुर्णां सप्ताहानां निरन्तरवृद्धेः अनन्तरं अस्मिन् दिने विपण्यां लाभांशस्य आरक्षणार्थं निवेशकैः विक्रयप्रवृत्तिः स्वीकृता। फलतः उभयोः प्रमुखसूचकाङ्कयोः पर्याप्ता न्यूनता अभवत्।

अस्याः विपणनमन्दतायाः प्रभावः निवेशकानां सम्पत्तिषु अपि स्पष्टतया दृश्यते। एकस्मिन्नेव दिने निवेशकानां सम्पूर्णसम्पत्तौ पञ्चलक्षकोटिरूप्यकेभ्यः अधिकस्य न्यूनतायाः अनुमानं कृतम्। विपण्याः पतनस्य प्रमुखकारणेषु पूर्ववृद्धेः अनन्तरं लाभांशसङ्ग्रहाय कृतः विक्रयः, दुर्बलाः वैश्विकविपणनसङ्केताः, दिसम्बरमासे अमेरिकादेशस्य केन्द्रीयवित्तकोषेण (फेडरलरिजर्व) वृद्धिधनस्य वृद्धेः सम्भावना प्रमुखतया परिगणिताः। एतेषां कारणानां प्रभावेण भारतीयांशविपण्यां निवेशकानां विश्वासः प्रभावितः अभवत् तथा च विक्रयदबावः वर्धितः। समग्रतया सोमवासरस्य विपणनव्यवहारेण भारतीय- शेयरविपण्यां सावधानतायाः वातावरणं निर्मितम्



राज्यपालभ्रमणार्थं स्वास्थ्यविभागः सन्नद्धः

हिमसंस्कृतवार्ताः- वत्सदेशराजशर्मा, नाहनम्, नवम्बरमासस्य २३ दिनाङ्कः। हिमाचलप्रदेशस्य राज्यपालस्य नवम्बरमासस्य २४ तथा २५ दिनाङ्कयोः सिरमौरजनपदभ्रमणं पुरस्कृत्य स्वास्थ्यविभागेन आवश्यकाः सज्जताः आरब्धाः। अस्मिन् सन्दर्भे सिरमौरजनपदस्य मुख्यचिकित्साधिकारिणा अतीवावश्यकः आदेशः निर्गमितः।आदेशानुसारं राज्यपालः नवम्बरमासस्य २४ तथा २५ दिनाङ्कयोः श्रीरेणुकाजी, पश्मी (शिलाई) तथा काला अम्ब इत्येतेषु स्थानेषु भ्रमणं करिष्यति। अस्मिन्नवसरे राज्यपालाय विशिष्टातिथि- चिकित्सासेवां प्रदातुं सर्वसुविधायुक्तया रुग्णवाहिकया सह चिकित्सकदलस्य गठनं कर्तुं निर्देशाः प्रदत्ताः सन्ति।मुख्यचिकित्साधिकारिणा सङ्गडाह, शिलाई, धगेडा, सराहा इत्येतेषां खण्डानां च चिकित्साधिकारिभ्यः निर्देशः प्रदत्तः यत् ते सम्पर्कविवरणैः सह चिकित्सकदलस्य गठनं कृत्वा तस्य सूचनां कार्यालयं प्रेषयेयुः। प्रशासनविभागेन आरक्षीविभागेन च सह समन्वयं स्थापयित्वा राज्यपालस्य भ्रमणस्य प्रतिक्षणं सूचनां प्राप्तुं च निर्देशः दत्तः, येन चिकित्सासेवायां कोऽपि प्रमादः न भवेत्। भ्रमणस्य विस्तृतः कार्यक्रमः पृथक् प्रेषयिष्यते इत्यपि आदेशे उल्लिखितम्।

१०८ रुग्णवाहिकायाः रक्तस्य च व्यवस्था

राज्यपालस्य भ्रमणकाले वाहनसमूहेन सह विमानावतरणस्थले (हेलीपैड) अपि १०८ रुग्णवाहिकायाः व्यवस्थां कर्तुं राष्ट्रिय-स्वास्थ्य- अभियानस्य मिशननिदेशकाय, डॉ. वाई. एस. परमार- चिकित्सा- महाविद्यालयस्य चिकित्साधीक्षकाय, मेडस्वान- फाउण्डेशन-संस्थायै अनुरोधः प्रेषितः। तदतिरिक्तं नाहनस्थिते डॉ. वाई. एस. परमार- चिकित्सा- महाविद्यालये विशिष्टातिथिचिकित्सासेवायै A धनात्मक-रक्तसमूहस्य (A+) द्वयोः रक्तैककयोः व्यवस्थां कर्तुं निर्देशः प्रदत्तः। अस्यादेशस्य प्रतिलिपिः आवश्यक- कार्याचरणकरणाय सिरमौरजनपदस्य उपायुक्ताय, आरक्षिअधीक्षकाय, ददाहू- नागरिक-चिकित्सालयस्य वरिष्ठचिकित्साधिकारिणे चापि प्रेषिता अस्ति।

हिमाचल-उच्चन्यायालयस्य निर्णयः त्रयाणां कर्मचारिणां पदच्युतिः ६६.१३ लक्ष-रूप्यकाणां निष्कासन-आदेशश्च निरस्तः

हिमसंस्कृतवार्ता - शिमला।

हिमाचलप्रदेश-उच्चन्यायालयेन कुल्लू-मण्डलस्य निरमण्ड-खण्डस्य चैल-ग्रामपञ्चायते मनरेगा-पौधारोपण-कार्येषु कृतानां कथित-अनियमितानां प्रकरणे पञ्चायत-सचिवाय द्वाभ्यां प्राविधिक-सहायकाभ्यां च महान् उपशमः दत्तः। न्यायाधीशस्य जियालालभारद्वाजस्य पीठेन अधिकारिणां पदच्युतेः ६६,१३,०९० रूप्यकाणां निष्कासनस्य च आदेशाः प्राकृतिक-न्यायस्य सिद्धान्तानां उल्लङ्घनं निरूप्य निरस्ताः कृताः। एतत् प्रकरणं २०११ तः २०१४ वर्षयोः मध्ये चैल-पञ्चायते कृतेषु पौधारोपण-कार्येषु वित्तीय-अनियमिततानां परिवादेन सह सम्बद्धम् अस्ति।

एसडीएम-आनी इत्यस्य अन्वेषणेन स्पष्टमभवत् यत् पञ्चायतेन २६,९०,३६४ रूप्यकैः २,२४,३९७ पादपाः (पौधे) क्रीताः आसन्। एते २७ स्थानेषु रोपणीयाः आसन्, किन्तु भूमेः पौधारोपणस्य च उचितम् अभिलेखं (रिकॉर्ड) न प्राप्तम्। अन्वेषण-प्रतिवेदनस्य (जाञ्च-रिपोर्ट) आधारेण सम्बद्ध-अधिकारिणा ११ जनबरी २०१६ दिनाङ्के पूर्व-प्रधान-सन्देवठाकुरस्य, पञ्चायत-सचिव-चैनरामस्य तथा तत्कालीन-प्राविधिक-सहायकयोः मानसुख-दर्शनदेवयोः विरुद्धम् एफआईआर (FIR) पञ्जीकरणस्य, चतुर्भ्यः समानांशेन ६६.१३ लक्षरूप्यकेभ्यः अधिकस्य निष्कासनस्य तथा च त्रयाणां कर्मचारिणां सेवा-समाप्तेः आदेशाः दत्ताः आसन्।

याचिकाकर्तृभिः एषः आदेशः उच्चन्यायालये आह्वानितः आसीत्। विचारणायां न्यायालयेन प्राप्तं यत् न तु अन्वेषणे याचिकाकर्तारः सम्मिश्रिताः कृताः, न च तेभ्यः साक्षिभिः सह प्रतिपरीक्षणस्य अवसरः दत्तः। एतदतिरिच्य, कार्यविधितः पूर्वं न तु तेभ्यः कारण-पृच्छा-सूचना (कारण बताओ नोटिस) दत्ता, न च अन्वेषण-प्रतिवेदनस्य प्रतिलिपिः उपलब्धा कारिता।

हिमाचले शैत्येन सरांसि हिमीभूतानि : एतेषु त्रिषु मण्डलेषु नीहारः व्याप्तः



हिमसंस्कृतवार्ता — शिमला।
हिमाचलप्रदेशे शैत्यस्य प्रभावः निरन्तरं वर्धमानः अस्ति। उच्चक्षेत्रेषु सरांसि हिमत्वेन परिणन्तुम् आरब्धानि। समतल-मध्यपर्वतीयक्षेत्रेषु प्रातःकाले नीहारः जनानां कष्टं वर्धयति। बिलासपुर-हमीरपुर-मण्डिमण्डलानां जलाशयानां समीपे स्थितेषु बहुषु क्षेत्रेषु सोमवासरे प्रातः सघननीहारः व्याप्तः आसीत्। अस्माद् कारणात् कतिपयेषु स्थानेषु दृश्यता न्यूनीभूय केवलं ५० मीटर्-परिमिता एवावशिष्टा। न्यूनदृश्यतायाः कारणात् मार्गेषु वाहनचालकाः अपि कठिनतायाः सम्मुखीकरणं कृतवन्तः। जनजातीयमण्डले लाहौल-स्पीति-मध्ये अधिकांशानि सरांसि हिमत्वेन परिणन्तुम् आरब्धानि। प्रायः १३,०५० पादोच्चे रोहताङ्ग-दर्रा (पर्वतीयमार्गे) स्थितं रोहताङ्ग-सरः अपि पूर्णतया हिमीभूतः।

सूरजताल-दीपकताल-सहितं घेपन-चन्द्रताल-सरांसि अपि हिमीभूतानि

मनाली-लेह-राष्ट्रियराजमार्गे स्थितस्य सूरजताल-दीपकतालाभ्यां सह घेपन-सरसः चन्द्रताल-सरसश्च अर्धाधिकं जलं हिमीभूतम्। तथैव, लाहौलस्य नैनगारक्षेत्रे स्थितं पवित्रं नीलकण्ठ-सरः अपि अति-शैत्यस्य कारणात् हिमे परिणन्तुम् आरब्धम्। उच्चक्षेत्रेषु रात्रौ तापमानं शून्यतः १० डिग्रा-सेल्सियस्-परिमाणं यावत् अधः गच्छति। अनेन सरसां तीरेषु पृष्ठेषु च हिमस्य स्थूला पटली (परत) निर्मातुम् आरब्धा। ऋतुविज्ञानकेन्द्रेण शिमला-स्थितेन जलाशयानां परितः क्षेत्रेषु मङ्गलवासरे बुधवासरे च अपि नीहारस्य पीत-सतर्कता (येलो अलर्ट) कृता। विशेषतः प्रातःकाले चिररात्रौ च नीहारस्य प्रभावः अधिकः भवितुं सम्भावना अस्ति।

किन्नौरस्य मलिंग-उपनदः हिमीभूतः, एन.एच-5 मध्ये प्रस्खलनस्य सङ्कटः वर्धितः

साङ्गला (किन्नौर) जनजातीयमण्डले किन्नौरे तापमानस्य तीव्रपातेन उच्चक्षेत्रेषु उपनदाः हिमीभूताः अभवन्। पूह-उपमण्डले राष्ट्रियराजमार्ग-५ मध्ये पतति मलिंग-उपनदे अपि जलं हिमीभूतम्। उपनदस्य परितः गच्छति राष्ट्रियराजमार्ग-५ मध्ये अपि जलस्य कठोरेण मार्गे हिमस्य पटली निर्मिता भवति। अनेन इतः गच्छन्तः वाहनचालकाः महतीनां कठिनतानां सम्मुऐ कुर्वन्तः सन्ति।

विभागेभ्यः सज्जीकरणाय निर्देशाः

उपायुक्त-किन्नौर सोनाक्षीसिंहतोमरः शीतकाले सम्भावित-हिमपातस्य आपत्स्थितीनां च सम्मुखीकरणाय सर्वान् विभागान् परस्परसमन्वयेन सज्जीभवितुं निर्देशान् दत्तवती। सा अधिकारिभ्यः निर्देशम् अदात् यत् राष्ट्रियराजमार्ग-५ इत्यस्य संवेदनशीलस्थलेषु निगुलसरी-नाथपा-मलिंगनालेषु पर्याप्तं यन्त्रजातं (मशीनरी) श्रमिकांश्च उपलब्धौ स्थापयन्तु, येन मार्गस्य अवरोधे सति शीघ्रमेव पुनःसञ्चालनस्य कार्यं प्रारब्धं भवेत्। स्वास्थ्यविभागस्य कृते चिकित्सालयेषु जीवनरक्षकौषधीनां पर्याप्तमूर्त्तिं तथा च खाद्य-आपूर्तिविभागस्य कृते खाद्यान्न-पेट्रोल्-डीजल्-LPG इत्येतेषामविरतामूर्त्तिं निश्चितां कर्तुं निर्देशाः दत्ताः। तया जलशक्ति-विद्युद्विभागौ पेयजल-विद्युदापूर्ती सुचारू स्थापयितुम् उक्तौ।

प्रातः सायञ्च शैत्यस्य प्रभावः यथावत्

सोमवासरे राजधान्या शिमला-सहितं प्रदेशस्य अधिकांशमण्डलेषु ऋतुः स्वच्छम् आसीत् आदिनं च आतपः (धूप) प्रसरति स्म। तथापि रात्रौ तापमानस्य पातेन प्रातः सायञ्च शैत्यस्य प्रभावः यथावत् अस्ति। प्रदेशस्य उच्चक्षेत्रेषु रात्रेः तापमाने निरन्तरं पातः अङ्कितः भवति। लाहौल-स्पीति-किन्नौरयोः अधिकांशक्षेत्रेषु रात्रेः तापमानमेषु दिनेषु शून्यतः अधः चलति। प्रदेशे २९ नवम्बर्-दिनाङ्कं यावत् ऋतुः स्वच्छं स्थास्यति इति पूर्वानुमानम् अस्ति। अस्मिन् अन्तराले वृष्टेः हिमपातस्य च सम्भावना नास्ति। सोमवासरे ऊना-मध्ये अधिकतमं तापमानं २७.६, काङ्गडा-मध्ये २६.१, बिलासपुर-मध्ये २६.०, चम्बा-मध्ये २४.१, मण्डि-मध्ये २३.९, नाहन-मध्ये २२.५, सोलन-मध्ये २२.२, शिमला-मध्ये १९.०, मनाली-मध्ये १७.०, कल्पा-मध्ये १५.८, केलाङ्ग-मध्ये १३.७, ताबो-मध्ये च ९.७ डिग्रा-सेल्सियस् अङ्कितम्।

विधानसभाध्यक्षः कुलदीपसिंहपठानिया IGMC- चिकित्सालये प्रवेशितः, शीतकालीन-सत्रकाले अस्वस्थता अभवत्



हिमसंस्कृतवार्ताः- शिमला।
हिमाचलविधानसभायाः अध्यक्षस्य कुलदीपसिंह पठानिया इत्यस्य स्वास्थ्यस्य अव्यवस्थायाः अनन्तरं सोमवासरे प्रातः सः इन्दिरागान्धी- आयुर्विज्ञान-महाविद्यालये चिकित्सालये च प्रवेशितः। सः विगतकतिपयदिवसेभ्यः ज्वरपीडितः आसीत्। विधानसभायाः शीतकालीन- सत्रकाले अपि तस्य स्वास्थ्यं सम्यक् नासीत्। सत्रसमाप्तेः अनन्तरं सः शिमलानगरं प्राप्तवान्, किन्तु ज्वरस्य प्रशमनं न जातम्, अतः सः चिकित्सालये प्रवेशयितव्यः अभवत्।चिकित्सालयप्रबन्धनेन उक्तं यत् विधानसभाध्यक्षाय ज्वरस्य समस्या वर्तते। तस्य स्वास्थ्यपरीक्षणाय चिकित्सकैः आवश्यकाः परीक्षाः कारिताः सन्ति, परीक्षणप्रतिवेदनम् अग्रे अन्वेषणाय प्रेषितम् अस्ति। सम्प्रति सः वैद्यकीयनिरीक्षणे (मेडिकल ऑब्जर्वेशन) स्थापितः अस्ति। ज्वरस्य कारणानि अधुना यावत् ज्ञातुं न शक्यन्ते। परीक्षणप्रतिवेदने प्राप्ते एव रोगस्य स्थितिः स्पष्टा भविष्यति। IGMC इत्यस्य उपचिकित्साधीक्षकेण डॉ. प्रवीण एस भाटिया इत्यनेन उक्तं यत् विधानसभाध्यक्षः कुलदीपसिंह पठानिया ज्वरसमस्यायाः कारणात् चिकित्सालये प्रवेशितः अस्ति। तस्य आवश्यकाः परीक्षाः कृताः सन्ति अन्वेषणाय च प्रतिवेदनानि प्रेषितानि सन्ति। चिकित्सकाः तस्य स्वास्थ्ये निरन्तरं दृष्टिं स्थापयन्ति।

मुख्यमन्त्री सुक्खू, मुकेश अग्निहोत्री जयरामठाकुरश्च कुशलक्षेमं ज्ञातवन्तः

विधानसभाध्यक्षस्य चिकित्सालये प्रवेशस्य सूचनां प्राप्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खू IGMC प्राप्तवान्, तस्य कुशलक्षेमं च ज्ञातवान् तस्य शीघ्रं स्वस्थतायै कामनां च कृतवान्। प्रतिपक्षनेता जयरामठाकुरः अपि करसोग-विधायकेन दीपराजेन सह IGMC प्राप्तवान्। एतौ अपि चिकित्सालये कुलदीपसिंहपठानिया इत्यनेन सह मिलित्वा तस्य कुशलक्षेमं ज्ञातवन्तौ तस्य स्वास्थ्यस्य सूचनां च गृहीतवन्तौ। एतेन सह उपमुख्यमन्त्री मुकेशअग्निहोत्री अपि IGMC प्राप्तवान् तथा च तस्य कुशलक्षेमं ज्ञातवान्।

विद्यापतिः केवलं मिथिलायाः न, अपितु सम्पूर्णभारतस्य सांस्कृतिकास्मितायाः प्रतीकः आसीत् — मुख्यमन्त्री सम्राट् चौधरी

एकमासाभ्यन्तरे प्राथमिकविद्यालयेषु मैथिलीभाषायाः शिक्षणम् आरप्स्यते — शिक्षामन्त्री





चेतनासमितेः त्रिसप्ततितमे विद्यापतिस्मृतिपर्वसमारोहे पञ्च विभूतयः सम्मानिताः; मैथिलीभाषाशिक्षायाः, आजीविकायाः, उद्यमशीलतायाः, मिथिलायाः समग्रविकासस्य च विषये प्रमुखवक्तृभिः विचाराः प्रस्तुताः।

हिमसंस्कृतवार्ता राघव नाथ झा

चेतनासमितेः पटनायाः च तत्त्वावधाने मिलर-उच्चविद्यालयस्य ऐतिहासिके प्राङ्गणे आयोजिते त्रिसप्ततितमे कविकोकिलमहाकविविद्यापतिस्मृतिपर्वसमारोहे बिहारराज्यस्य मुख्यमन्त्री सम्राट् चौधरी महाकविं विद्यापतिं सादरं स्मृत्वा अवदत् यत् विद्यापतिः केवलं मिथिलायाः एव न, अपितु सम्पूर्णभारतस्य सांस्कृतिकास्मितायाः प्रतीकः आसीत्। तस्य रचनासु भारतीयसंस्कृतेः, भक्तेः, साहित्यस्य, लोकजीवनस्य च अद्भुता अभिव्यक्तिः दृश्यते। अस्मिन् समारोहे मुख्यमन्त्रिणा सह अनेकैः गणमान्यैः व्यक्तिभिः महाकवये श्रद्धाञ्जलिः समर्पिता। विविधक्षेत्रेषु विशिष्टयोगदानाय पञ्च विभूतयः अपि सम्मानिताः।

समारोहस्य शुभारम्भः महाकविना विद्यापतिना विरचितायाः प्रसिद्धायाः भगवतीवन्दनायाः 'जय जय भैरवि' इत्यस्याः मिथिलायाः पारम्परिकया मधुरया च प्रस्तुत्या अभवत्। 'भारत मातायाः जयः' तथा 'मातुः जानक्याः जयः' इति घोषैः समन्विते वातावरणे मुख्यमन्त्री स्वसम्बोधने अवदत् यत् बिहारप्रदेशः ज्ञानस्य, साहित्यस्य, कलायाः, संस्कृतेः च पुण्यभूमिः अस्ति, यत्र भगवत्याः जानक्याः अवतरणम् अभवत्। १९५४ तमे वर्षे स्थापितायाः चेतनासमितेः साहित्यस्य, कलायाः, संस्कृतेः च संरक्षणे संवर्धने च निरन्तरं महत्त्वपूर्णं योगदानं वर्तते। विद्यापतिस्मृतिपर्वणः नियमितम् आयोजनम् अस्माकं सांस्कृतिकचेतनां स्वकीयमूलैः सह सम्बन्धं च दृढीकरोति। भाषिकपरम्परायाः उल्लेखं कुर्वन् मुख्यमन्त्री अवदत् यत् बिहारप्रदेशे मगही, आङ्गिका, वज्जिका, मैथिली च इत्यादयः समृद्धाः भाषाः प्रचलिताः सन्ति। मैथिली अतीव प्राचीना समृद्धा च भाषा अस्ति। मैथिल्याः आङ्गिकायाश्च गाढस्य सांस्कृतिकसम्बन्धस्य उल्लेखं कुर्वन् सः प्रधानमन्त्री नरेन्द्रमोदिनं प्रति भारतीयसंविधानस्य मैथिलीभाषायां प्रकाशनार्थं कृतज्ञताम् अपि प्रकटितवान्।

मुख्यमन्त्री मिथिलायाः विकासे क्षेत्रवासिनां योगदानस्य प्रशंसां कुर्वन् कोसी-मेची-नदीसंयोजनपरियोजनायै प्रायः एकादशसहस्रकोटिरूप्यकाणां विनियोजनस्य, कोसीतटबन्धानां सुदृढीकरणस्य, बाढसमस्यायाः समाधानार्थं क्रियमाणानां प्रयासानां च उल्लेखम् अकरोत्। मिथिलायाः मखानस्य 'सुपरफूड्' इति नाम्ना वैश्विकमान्यताप्राप्तिः क्षेत्रस्य आर्थिकसम्भावनाभिः सह सम्बद्धा इति सः अवदत्। दरभङ्गास्थितस्य अन्तर्राष्ट्रीयविमानपत्तनस्य विकासस्य उल्लेखं कुर्वन् प्रायः ४.५ किलोमीटर्-दीर्घायाः प्रस्तावितायाः धावनपट्टिकायाः चर्चाम् अकरोत्। अनेन उत्तरबिहारस्य विमानयातायातव्यवस्थायाः विस्तारस्य सम्भावना वर्तते। मधुबनीनगरे सिमेण्ट्-उद्योगस्य स्थापनायाः, विद्यापतिस्मारकस्य निर्माणस्य, पटना-नगरे च महाकविविद्यापतेः पूर्णकायप्रतिमास्थापनस्य प्रस्तावस्य अपि उल्लेखम् अकरोत्। मुख्यमन्त्री अवदत् यत् मिथिलायाः भाषा, संस्कृतिः, विकासश्च बिहारस्य समग्रप्रगतेः अभिन्नाङ्गानि सन्ति। चेतनासमितेः अध्यक्षः विवेकानन्द झा मुख्यमन्त्रिणः स्वागतं कुर्वन् अवदत् यत् विद्यापतिस्मृतिपर्वसमारोहे मैथिलसमाजः स्वकीयस्य मैथिलमुख्यमन्त्रिणः हार्दिकम् अभिनन्दनं करोति। अत्यधिकव्यस्ततायामपि मुख्यमन्त्रिणा समारोहाय समयः प्रदत्तः, इति समितेः मिथिलासमाजस्य च कृते गौरवस्य प्रसन्नतायाश्च विषयः अस्ति। अस्मिन्नवसरे चेतनासमितेः स्मारिकायाः लोकार्पणम् अपि अभवत्।

आजीविकायाः, उद्यमशीलतायाः, आर्थिकस्वावलम्बनस्य च विषये विशेषावधानम् आवश्यकम् — सञ्जय झा

समारोहे सञ्जय झा बिहारस्य अर्थव्यवस्थायाः, आजीविकायाः, आर्थिकस्वावलम्बनस्य च सम्बन्धे महत्त्वपूर्णान् प्रश्नान् उत्थापितवान्। सः अवदत् यत् बिहारप्रदेशे एतादृशं आर्थिकवातावरणं निर्मातुं आवश्यकता वर्तते, यत्र प्रत्येकस्य व्यक्तेः आयस्य सुनिश्चितः स्थायी च स्रोतः भवेत् तथा सः सम्मानपूर्वकं स्वजीवनं यापयितुं शक्नुयात्। पटनां बेगूसरायं च विहाय राज्यस्य अन्येषां क्षेत्राणाम् आर्थिकस्थितेः विषये अपि गम्भीरतया विचारः करणीयः इति सः प्रतिपादितवान्।

प्राथमिकविद्यालयेषु मैथिलीभाषायाः शिक्षणम् आरप्स्यते — शिक्षामन्त्री

बिहारसर्वकारस्य शिक्षामन्त्री मिथिलेश तिवारी महाकवये विद्यापतये श्रद्धाञ्जलिं समर्पयन् अवदत् यत् विश्वस्य विभिन्नेषु भागेषु मिथिलायाः संस्कृतेः विशिष्टा परिचितिः महत्ता च वर्तते। विद्यापतेः काव्येषु भक्तेः, शृङ्गारस्य, वैराग्यस्य च विविधरसानाम् अनुपमः समन्वयः दृश्यते। मैथिलीभाषया उपस्थितान् जनान् सम्बोधयन् सः अवदत् यत् यद्यपि सः भोजपुरीभाषाप्रदेशात् आगतः, तथापि मिथिलया सह तस्य गाढः आत्मीयसम्बन्धः अस्ति। एतस्याः आत्मीयतायाः कारणात् सः स्वयम् अपि मिथिलेशः इति अनुभूयते। सः घोषणाम् अकरोत् यत् आगामिनि एकमासाभ्यन्तरे बिहारस्य सर्वेषु प्राथमिकविद्यालयेषु मैथिलीभाषायाः शिक्षणं सुचारुरूपेण प्रारम्भयितुं कार्याचरणं क्रियते। मैथिलीभाषायाः प्राथमिकशिक्षया सह संयोजनम् तथा बालकेभ्यः मातृभाषायां पठितुम् अवसरप्रदानम् आवश्यकम् अस्ति इति सः अवदत्। मिथिलायाः विकासः मैथिलीभाषायाः संवर्धनं च परस्परपूरकौ स्तः। शिक्षया एव भाविपीढीनां मनसि स्वभाषायाः, साहित्यस्य, संस्कृतेः च गौरवभावः जनयितुं शक्यते। नगरविकासमन्त्री नीतीश मिश्र अवदत् यत् महाकविः विद्यापतिः मिथिलावासिनां कण्ठहारः आसीत्। तस्य रचनाः अद्यापि मिथिलायाः जनजीवने, भाषायां, संस्कृतौ च गभीरतया समाविष्टाः सन्ति। बिहारभाजपायाः अध्यक्षः सञ्जय सरावगी अपि महाकवेः साहित्यिकस्य सांस्कृतिकस्य च योगदानस्य स्मरणम् अकरोत्।

पुस्तककलाप्रदर्शन्याः उद्घाटनम्

बिहारराज्यस्य प्रथममहिला सविहा हसनैन पुस्तककलाप्रदर्शन्याः उद्घाटनम् अकरोत्। प्रदर्शन्याः अवलोकनं कुर्वती सा महिलाभिः निर्मितानां मिथिलाचित्रकलाकृतीनां, हस्तशिल्पवस्तूनां, अन्यासां कलाकृतीनां च प्रशंसाम् अकरोत्। बाल्यकालादेव तस्याः हस्तकलायां चित्रकलायां च रुचिः आसीत् तथा एतादृशे आयोजने भागं गृहीत्वा तस्यै विशेषा प्रसन्नता जाता इति सा अवदत्।

साहित्यकला-समाजसेवाक्षेत्रेषु पञ्च विभूतयः सम्मानिताः

समारोहे विविधक्षेत्रेषु विशिष्टयोगदानाय पञ्च विभूतयः सम्मानिताः। सम्मानप्राप्तेषु संस्कृतभाषायाः साहित्यस्य च क्षेत्रे प्रो. रामगुलाम मिश्रः 'संस्कृतभाषा-साहित्यसम्मानेन', सुरेन्द्रनारायण यादवः 'सङ्गीत-रङ्गमञ्चसम्मानेन', प्रो. सोनी झा 'मिथिलाचित्रकला-लोककलासम्मानेन', डॉ. सन्तकुमार चौधरी 'चेतना-समाजसेवासम्मानेन' तथा विवेकानन्द ठाकुरः 'चेतना-सेवीसम्मानेन' सम्मानिताः।

कुलपतिः सञ्जयकुमारचौधरी मुख्यमन्त्रिणा प्रदत्तेन प्रतिष्ठितेन 'मिथिलाविभूतिसम्मानेन- २०२६' सम्मानितः



ललितनारायण- मिथिला- विश्वविद्यालय- परिसरस्थे डॉ.नागेन्द्रझा-क्रीडाङ्गणे आयोजिते ५४ तमे विद्यापतिपर्वसमारोहे सम्मान-प्राप्त्या विश्वविद्यालय- परिवारे हर्षोल्लासस्य गौरवस्य च वातावरणम्

हिमसंस्कृतवार्ता राघव नाथ झा, दरभंगा

दरभङ्गायां स्थितस्य ललितनारायण- मिथिला- विश्वविद्यालयस्य कुलपतिः प्रोफेसरः सञ्जयकुमारचौधरी बिहारराज्यस्य मुख्यमन्त्रिणा सम्राट चौधरीमहोदयेन प्रतिष्ठितेन 'मिथिला- विभूति- सम्मानेन- २०२६' सम्मानितः। अस्मिन् अवसरे सम्पूर्णे विश्वविद्यालयपरिवारे हर्षोल्लासस्य गौरवस्य च वातावरणं वर्तते। अयं सम्मानः कुलपतेः शैक्षणिक- प्रशासनिक- नेतृत्वस्य, कार्यकुशलतायाः, विद्यार्थिनां सर्वाङ्गीणविकासे तस्य प्रतिबद्धतायाः, अनुसन्धानकार्याणां प्रोत्साहनस्य, विश्वविद्यालयस्य सामाजिक- सम्बद्धतायाः संवर्धनस्य च दिशि क्रियमाणानां विशिष्टप्रयत्नानां गौरवपूर्णम् अभिज्ञानम् अस्ति। विश्वविद्यालयपरिसरस्थे डॉ. नागेन्द्रझा- क्रीडाङ्गणे दरभङ्गायां च महाकविकोकिलस्य विद्यापतेः पुण्यतिथेः पावनावसरे विद्यापतिसेवासंस्थया दरभङ्गया आयोजितस्य त्रिदिवसीयस्य ५४ तमस्य 'मिथिला- विभूतिपर्व- समारोहस्य-२०२६' उद्घाटनसमारोहे बिहारराज्यस्य मुख्यमन्त्रिणा सम्राट चौधरीमहोदयेन कुलपतये अयं प्रतिष्ठितः सम्मानः प्रदत्तः।

कुलपतये प्राप्तः अयं सम्मानः तस्य कुशलनेतृत्वस्य, दूरदर्शितापूर्णदृष्टेः, विश्वविद्यालयस्य शैक्षणिकवातावरणं अधिकगुणवत्तापूर्णम्, अनुसन्धानप्रधानं विद्यार्थिकेन्द्रितं च कर्तुं क्रियमाणानां प्रयत्नानां महत्त्वपूर्णम् अभिज्ञानम् अस्ति। शैक्षणिक- गुणवत्तायाः संवर्धने, प्रशासनिकव्यवस्थायाः सुदृढीकरणे, विद्यार्थिनां प्रतिभायाः क्षमतायाश्च विकासे, शोधकार्याणां नवाचारस्य च प्रोत्साहने तथा विश्वविद्यालयं समाजस्य आवश्यकताभिः सह संयोजयितुं च तस्य योगदानं विशेषतया उल्लेखनीयम् अस्ति। एषा उपलब्धिः न केवलं कुलपतेः व्यक्तिगतः सम्मानः, अपि तु ललितनारायण- मिथिला- विश्वविद्यालयस्य गौरवशालिन्याः शैक्षणिक- परम्परायाः, समृद्धायाः सांस्कृतिक- धरोहरायाः, सम्पूर्णस्य विश्वविद्यालयपरिवारस्य सामूहिक- सफलतायाः प्रतीकम् अस्ति। महाकवेः विद्यापतेः स्मृतौ मिथिलायाः पावनभूमौ आयोजिते अस्मिन् प्रतिष्ठिते समारोहे मुख्यमन्त्रिणा प्रदत्तः अयं सम्मानः विश्वविद्यालयस्य प्रतिष्ठां गौरवं च नूतनाम् उन्नतिं प्रापयति। मुख्यमन्त्रिणा कुलपतये प्रदत्तेन अनेन सम्मानेन विश्वविद्यालयस्य शिक्षकाणां, शिक्षकेतरकर्मचारिणां, शोधार्थिनां, विद्यार्थिनां तथा पूर्वच्छात्राणां च मध्ये विशेषः उत्साहः प्रसन्नता च वर्तते। सम्पूर्णः विश्वविद्यालयपरिवारः इमाम् उपलब्धिं स्वकीयां सामूहिकसफलतां मन्यमानः गौरवमनुभवति।



सांस्कृतिकप्रस्तुतिभिः समारोहः समाकर्षितः

समारोहस्य सांस्कृतिककार्यक्रमः विशेषाकर्षणस्य केन्द्रम् अभवत्। सारेगामापा-कार्यक्रमेण प्रसिद्धिं प्राप्तवान् ख्यातनामा गायकः जय झा महाकवेः विद्यापतेः लोकप्रियगीतानां मधुराभिः प्रस्तुतिभिः श्रोतॄन् भावविभोरान् अकरोत्। तस्य प्रस्तुतौ सभागारे उपस्थितैः दर्शकैः मुक्तकण्ठेन प्रशंसा कृता। डॉ. रञ्जना झा, अरुणीता झा, विजय कपूरः, मुस्कान झा च स्वकीयाभिः उत्कृष्टाभिः प्रस्तुतिभिः सांस्कृतिकसन्ध्यां स्मरणीयाम् अकुर्वन्।झिझिया, जट-जटिननृत्यस्य तथा विद्यापतेः पदानि आधृत्य प्रस्तुतानां भावनृत्यानां माध्यमेन मिथिलायाः समृद्धा लोकसांस्कृतिकपरम्परा जीवन्तीकृता। सङ्गीतस्य, लोकनृत्यस्य, विद्यापतेः पदानां च भावपूर्णाभिः प्रस्तुतिभिः सम्पूर्णं वातावरणं मिथिलामयं जातम्। अरविन्दकुमार झा 'अप्पू', शिवकुमार मिश्रः, भैरवलाल दासः इत्यादीनां बहूनां गणमान्यव्यक्तीनाम् उपस्थित्या समारोहस्य गरिमा वर्धिता।

सचिवेण वार्षिकप्रतिवेदनं प्रस्तुतम्

समितेः सचिवः जयदेव मिश्रः वार्षिकप्रतिवेदनं प्रस्तुत्य चेतनासमितेः गतिविधीनां उपलब्धीनां च विषये विस्तृतां सूचनाम् अददात्। सः सर्वेभ्यः अतिथिभ्यः, सहयोगिभ्यः, सदस्येभ्यश्च कृतज्ञताम् अर्पितवान्। जनगणनायां स्वमातृभाषारूपेण मैथिलीभाषायाः उल्लेखं कर्तुम् अपि सः सर्वान् आग्रहपूर्वकम् अवदत्। कार्यक्रमस्य सञ्चालनम् उमेश मिश्रः अकरोत्।समारोहे चेतनासमितेः उपाध्यक्षा मञ्जू झा, विपेन्द्र झा 'माधवः', प्रशान्त मिश्रा, कोषाध्यक्षः नारायण झा, संयुक्तसचिवः सतीशचन्द्र झा, दिनेश झा, मनोजकुमार झा, पूजा झा, प्रियङ्का मिश्र, किशोर चौधरी, वरिष्ठकलाकारः प्रेमलता मिश्र, अवधेश झा, पूर्वसचिवः विवेकानन्द ठाकुरः, ज्योतिषाचार्यः डॉ. राजनाथ झा, प्रभातरञ्जनः, अमित मिश्रः, हृदयनारायण झा, हरिगोविन्द झा, जितेन्द्र मिश्रः, डॉ. राघवनाथ झा, चन्दन ठाकुरः, उज्ज्वलकुमारः इत्यादयः चेतनासमितेः बहवः सदस्याः, साहित्यकाराः, कलाकाराः, समाजसेविनः, गणमान्याश्च व्यक्तयः उपस्थिताः आसन्।समारोहः महाकवेः विद्यापतेः अनुपमं साहित्यिकयोगदानं स्मारयन् मैथिलीभाषायाः, मिथिलायाः सांस्कृतिकवैभवस्य, लोककलायाः, मातृभाषामाध्यमेन शिक्षायाः, आजीविकायाः, आर्थिकस्वावलम्बनस्य, सामाजिकैकतायाश्च प्रति सामूहिकां प्रतिबद्धताम् अपि अभिव्यक्तवान्।

शिक्षकसमस्यासु शीघ्रकार्याचरणं कर्तुं शासनाय उत्तरप्रदेश- माध्यमिक- शिक्षकसङ्घस्य आग्रहः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ, नवम्बरमासः २३। उत्तरप्रदेश- माध्यमिक- शिक्षकसङ्घेन प्रदेशस्य अशासकीय- सहायताप्राप्त- माध्यमिकविद्यालयेषु कार्यरतशिक्षकाणां विविधसमस्याः समाधातुं शासनस्य ध्यानम् आकर्षितम्। सङ्घस्य अध्यक्षः, विधानपरिषदः पूर्वसदस्यः सुरेशकुमारत्रिपाठी, सङ्घस्य महामन्त्री नरेन्द्रकुमारवर्मा च अपरमुख्यसचिवाय (माध्यमिकशिक्षा) पृथक्-पृथक् पत्राणि प्रेष्य शीघ्रकार्याचरण कर्तुं निवेदनं कृतवन्तौ।

पुरातनवृत्तिव्यवस्थायाः लाभं प्रदातुं निवेदनम्

प्रथमपत्रे अशासकीय- सहायताप्राप्त- माध्यमिक- विद्यालयेषु समायोजितानां विषयविशेषज्ञानां शिक्षकाणां कृते पुरातनवृत्तिव्यवस्थायाः विकल्पं प्रदातुं शासनादेशस्य अनुपालनं न भवतीति विषयः प्रमुखतया उत्थापितः।

वित्तविभागस्य २०२४ तमस्य वर्षस्य जूनमासस्य २८ दिनाङ्के निर्गते शासनादेशे निहितव्यवस्थानुसारं नवीनवृत्तियोजनायाः स्थाने पुरातनवृत्तियोजनायाः विकल्पं प्रदातुं निर्देशाः निर्गताः आसन्। एतदर्थं सम्बन्धितैः शिक्षकैरपेक्षितानि सर्वाणि प्रमाणपत्राणि निर्धारितप्रपत्रेण 'क' सह प्रयागराजस्थिते शिक्षानिदेशालये समर्पितानि सन्ति। तथापि अद्यावधि सम्बन्धितविभागेन अपेक्षिता कार्याचरण न कृता। अतः सङ्घेन सम्बन्धिताधिकारिभ्यः प्रभावीकार्याचरणं कर्तुं तथा शासनादेशस्य शीघ्रं क्रियान्वयनं सुनिश्चितं कर्तुं निवेदनं कृतम्।

जनगणनाकर्तव्येन सह विद्यालयीय- शिक्षणकार्यस्य भारः

द्वितीयपत्रे जनगणना-२०२७ इत्यस्य द्वितीयचरणे प्रदेशस्य सहायताप्राप्तविद्यालयानां शिक्षकाः प्रगणक- पर्यवेक्षककर्तव्येषु नियुक्ताः इति विषयः प्रस्तुतः।सङ्घस्य कथनानुसारं शिक्षकाणां पुरतः एकस्मिन्नेव समये द्विविधं महत्त्वपूर्णं दायित्वं समागतं वर्तते। एकतः जनगणनाकार्यं राष्ट्रियहिताय महत्त्वपूर्णम् अस्ति, अपरतः विद्यालयेषु अध्ययनरतच्छात्राणां पाठ्यक्रमं निर्धारितसमये पूर्णं कारयितुमपि शिक्षकाणामेव दायित्वम् अस्ति। अस्यां विषमौ परिस्थितौ शिक्षकाः कथं द्वयोः कार्ययोः सम्यक् निर्वहणं कुर्युः, इति गम्भीरः प्रश्नः उत्पन्नः। अपि च प्रदेशस्य विभिन्नजनपदेषु विद्यालयनिरीक्षकैः पृथक्-पृथक् निर्देशाः प्रदीयन्ते, येन शिक्षकाणां सम्मुखे कार्यसम्बद्धाः समस्याः वर्धन्ते।

पत्रे विशेषतया उल्लेखितं यत् केषुचित् विद्यालयेषु शिक्षकाणां जनगणनाकर्तव्यं विद्यालयात् ३०-४० किलोमीटरपरिमिते दूरे निर्धारितम् अस्ति। एतादृशे सति विद्यालयीय- शिक्षणकार्यस्य जनगणना- कर्तव्यस्य च एकस्मिन्नेव काले निर्वहणं कठिनं भवति। अतः सङ्घेन सम्पूर्णप्रदेशस्य कृते एकरूपनिर्देशं निर्गत्य शिक्षकाणां समस्यायाः समाधानं कर्तुं शासनात् आग्रहः कृतः।

सङ्घाध्यक्षः सुरेशकुमारत्रिपाठी तथा महामन्त्री नरेन्द्रकुमारवर्मा इत्येताभ्यां शिक्षकहिताय उभयेषु विषयेषु सहानुभूतिपूर्वकं विचार्य शीघ्रातिशीघ्रं प्रभावीकार्याचरणं कर्तुं शासनं प्रति अपेक्षा प्रकटिता।

उत्तरप्रदेश-तदर्थ-शिक्षकाणां विषये शासनस्य नूतनः आदेशः निर्गतः

हिमसंस्कृतवार्ताः वृजेश कुमार पाण्डेयः, लखनऊउत्तरप्रदेशशासनेन सहायताप्राप्त- माध्यमिक- विद्यालयेषु कार्यरतानां तदर्थशिक्षकाणां विषये एकः महत्त्वपूर्णः शासनादेशः निर्गतः। अपरमुख्यसचिवेन पार्थसारथिसेनशर्मणा शिक्षाविभागस्य निर्देशकाय (माध्यमिक), प्रयागराजाय अस्मिन् विषये निर्देशः प्रदत्तः।

इलाहाबाद-उच्चन्यायालयस्य लखनऊ-खण्डपीठेन 'मनोजकुमारसिंहः, अन्ये विरुद्धम् उत्तरप्रदेशराज्यम्' (समादेश-याचिका संख्या-८२६२/२०२४) इत्यस्मिन् प्रकरणे २४ अगस्त २०२६ दिनाङ्के पारितस्य आदेशस्य अनुपालनार्थं अयं निर्णयः स्वीकृतः अस्ति।

आदेशस्य प्रमुखांशाः निम्नलिखितरूपेण सन्ति-

• पूर्वशासनादेशयोः निरसनम्: उच्चन्यायालयेन ९ नवम्बर २०२३ दिनाङ्कस्य (सेवासमाप्तेः) तथा ८ जुलाई २०२४ दिनाङ्कस्य (मानदेयव्यवस्थायाः) उभौ शासनादेशौ अपास्तौ कृतौ स्तः।

• सेवायाः निरन्तरता: येषां तदर्थशिक्षकाणां नियुक्तिः प्रबन्धतन्त्रेण माध्यमिक- शिक्षा- अधिनियमस्य (१९२१) धारा-१६ई(११) इत्यस्याः अन्तर्गतं नियमानुसारं कृता आसीत्, तेषां सेवा पूर्ववत् निरन्तरा भविष्यति।

• वेतनं तथा नियमाः- एतेभ्यः शिक्षकेभ्यः पूर्ववत् वेतनम् अन्याः नियमाः च प्रदास्यन्ते। किन्तु एतेषां भुगतानं केवलं तैः कृतस्य वास्तविककार्यस्य आधारेण एव भविष्यति।

• नियमितचयनपर्यन्तम् एव सेवाः एषा व्यवस्था चयन- आयोगात् नियमितरूपेण चयनितस्य अभ्यर्थिनः उपलब्धतापर्यन्तम् एव स्थास्यति। नियमितशिक्षकस्य आगमनानन्तरम् एतेषां सेवा स्वतः समाप्ता भविष्यति।

• निवृत्तिवेतन-लाभः नः एतैः तदर्थशिक्षकैः कृतायाः सेवायाः गणना निवृत्तिवेतन-हेतोः अर्हकारीसेवारूपेण न करिष्यते।

अपरमुख्यसचिवेन समस्त-सम्बद्धाधिकारिभ्यः अस्य आदेशस्य शीघ्रम् अनुपालनं सुनिश्चितं कृत्वा शासनं प्रति आख्यां प्रेषयितुं निर्देशः दत्तः अस्ति।

अम्बेडकरनगरे युवभ्यः आजीविकायाः सुवर्णावसरः, पञ्चदशाधिकैः संस्थाभिः सह पञ्चदशशताधिकानि रिक्तपदानि

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, अम्बेडकरनगरम्। उत्तरप्रदेश- आजीविका- मिशनस्य अन्तर्गतं जनपदस्य युवान् रोजगारावसरेण संयोजयितुं जिला सेवा- योजन- कार्यालयेन अम्बेडकरनगरे स्थानेषु द्वयोः विधानसभास्तरीय- आजीविकामेलयोः आयोजनं क्रियते। एतयोः आजीविकामेलयोः पञ्चदशाधिकाः प्रतिष्ठिताः कम्पन्यः सहभागं करिष्यन्ति। अत्र योग्याभ्यर्थिनः विभिन्नेषु पदेषु चयनस्य अवसरं प्राप्स्यन्ति।एतेषु आजीविकामेलयोः पञ्चदशशताधिकानि रिक्तपदानि उपलब्धानि सन्ति। चयनितेभ्यः अभ्यर्थिभ्यः प्रतिमासं द्वादशसहस्ररूप्यकात् पञ्चत्रिंशत्सहस्ररूप्यकाणि यावत् वेतनं प्रदास्यते। अभ्यर्थिनां वयः अष्टादशवर्षेभ्यः चत्वारिंशद्वर्षपर्यन्तं भवितव्यम्।शैक्षणिकयोग्यता- उच्चविद्यालयः, अन्तर्विद्यालयः, स्नातकः, स्नातकोत्तरः, बीबीए, बीसीए, बीटेक, पॉलिटेक्निक, आईटीआई, एमबीए, एमसीए इत्यादिषु योग्यतासु उत्तीर्णाः तथा सङ्गणककार्ये दक्षतां प्राप्तवन्तः अभ्यर्थिनः आवेदनं कर्तुं शक्नुवन्ति।

प्रथममेला-दिनाङ्कः- २७ नवम्बर् २०२६ (शुक्रवासरः) समयः- प्रातः दशवादनतः। स्थानम्- त्रिलोकनाथस्नातकोत्तरमहाविद्यालयः, टाण्डा, अम्बेडकरनगरम्।

द्वितीयमेला-दिनाङ्कः- २८ नवम्बर् २०२६ (शनिवासरः) समयः- प्रातः दशवादनतः। स्थानम्- बाबा बरुआदास- स्नातकोत्तर- महाविद्यालयः, परुइयाआश्रमः, जलालपुरम्, अम्बेडकरनगरम्।

उभयोः मेलयोः सहभागिता चयनप्रक्रिया च पूर्णतया निःशुल्का भविष्यति। इच्छुकाः अभ्यर्थिनः आजीविकासङ्गमपोर्टल इत्यत्र पञ्जीकरणं कर्तुं शक्नुवन्ति। पञ्जीकरणाय जालस्थानम् अस्ति- rojgaarsangam.up.gov.in

अधिकायाः सूचनायै सहायतायै च अभ्यर्थिनः १५५३३० इति दूरभाषसहायतासङ्ख्यायां सम्पर्कं कर्तुं शक्नुवन्ति। अतः जनपदस्य युवभ्यः सूचितं यत् ते अस्य अवसरस्य लाभं स्वीकर्तुं स्वमित्रेभ्यः अन्येभ्यश्च युवभ्यः एतां सूचनां प्रेषयेयुः, येन अधिकाधिकाः युवानः रोजगारावसरं प्राप्तुं शक्नुयुः।



वरिष्ठपत्रकारस्य

विजयकान्तदीक्षितस्य निधनम्, उपमुख्यमन्त्रिणा वृजेशपाठकेन भावपूर्णा श्रद्धाञ्जलिः समर्पिता



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊम्। वरिष्ठपत्रकारस्य विजयकान्तदीक्षितस्य दुःखदनिधनस्य वार्तां श्रुत्वा उत्तरप्रदेशस्य उपमुख्यमन्त्री श्रीवृजेशपाठकः अद्य लखनऊस्थे तस्य निवासस्थाने समुपस्थितः। तत्र सः दिवङ्गतस्य चित्रे पुष्पाञ्जलिं समर्प्य भावपूर्णां श्रद्धाञ्जलिं व्यदधात्। अनन्तरं शोकसन्तप्तैः परिजनैः सह मिलित्वा स्वीयां गहनां शोकसंवेदनां प्रकटितवान्।

अस्मिन् दुःखदावसरे मुख्यमन्त्री परमेश्वरं प्रार्थितवान्- दिवङ्गतस्य पुण्यात्मनः श्रीभगवतः श्रीचरणेषु स्थानं प्राप्नुयात् तथा च शोकसन्तप्तेभ्यः परिजनेभ्यः एतदसहनीयं दुःखं सोढुं धैर्यं सामर्थ्यं च प्रदीयताम्।

सनातनसंस्कारेषु मातृवन्दनायाः विशेषं स्थानम्- मुख्यमन्त्री योगी



हिमसंस्कृतवार्ताः वृजेशकुमारपाण्डेयः, लखनऊ।

सनातनसंस्कारेषु मातृवन्दनायाः भावना गभीरतया समन्विता अस्ति। केचन ऋणाः एतादृशाः भवन्ति, ये कदापि परिशोधयितुं न शक्यन्ते। तथापि स्वकर्तव्यस्य सम्यक् निर्वहणं तु निश्चयेन कर्तुं शक्यते। सार्वजनिकजीवने पदार्पणानन्तरं प्रदेशस्य मातृशक्तेः सेवां सम्मानं च प्रति एतदेव कर्तव्यं निर्वोढुं निरन्तरं प्रयत्नं करोमि इति मुख्यमन्त्री योगी आदित्यनाथः उक्तवान्। प्रत्येकस्याः मातुः प्रति वास्तविकः सम्मानः तदैव भविष्यति, यदा अद्य प्रत्येकः प्रदेशवासी संकल्पं स्वीकरिष्यति यत् सः कस्याश्चित् निराश्रयायाः मातुः आश्रयः भविष्यति, कस्याश्चित् वञ्चितायाः मातुः वेदनां सम्यगवगमिष्यति तथा च कस्याश्चित् दुःखितायाः मातुः मुखमण्डले स्मितहास्यं प्रस्फुटितं करिष्यति। मुख्यमन्त्रिणा योगी आदित्यनाथेन मातृशक्तेः सम्मानं, सेवा च समाजस्य प्रत्येकस्य नागरिकस्य नैतिकं कर्तव्यं भवितव्यमिति सन्देशः प्रदत्तः।



बिहारराज्यस्य ८९९ राजस्वन्यायालयेषु

अन्तर्जालमाध्यमेन श्रवणव्यवस्थायाः शुभारम्भः,

भूमिविवादनिराकरणे पारदर्शितायाः सुगमतायाश्च सम्भावना



हिमसंस्कृतवार्ताः- राघव नाथ झा, पटना

बिहारराज्ये भूमिसम्बद्धानां राजस्वविषयकानां च प्रकरणानां श्रवणप्रक्रियां अधिकं सुलभां पारदर्शिनीं च कर्तुं महत्त्वपूर्णः उपक्रमः आरब्धः अस्ति। मुख्यमन्त्री सम्राट् चौधरी सोमवासरे पटनानगरे राजस्व- न्यायालय- प्रबन्धन- प्रणाल्याः अन्तर्गतं राज्यस्य ८९९ राजस्वन्यायालयेषु आभासीय- श्रवणव्यवस्थायाः शुभारम्भम् अकरोत्। अस्याः व्यवस्थायाः प्रवर्तनेन अधुना पक्षकाराणां प्रत्येकश्रवणार्थं पुनः पुनः न्यायालयं गन्तुं आवश्यकता न्यूनीभविष्यति। ते अन्तर्जालमाध्यमेन श्रवणे भागं ग्रहीतुं शक्नुवन्ति, आवश्यकान् लेखपत्रान् प्रमाणानि च अङ्कीयमाध्यमेन प्रस्तौतुं शक्नुवन्ति। स्वप्रकरणानां वर्तमानस्थितिं ज्ञातुम् अपि तेषां कृते सुविधा उपलब्धा भविष्यति।

अस्य उपक्रमस्य विशेषता इयमपि अस्ति यत् अन्तर्जालमाध्यमेन सम्पन्नायाः श्रवणप्रक्रियायाः ध्वनिचित्राङ्कनं तस्याः च लिखितविवरणं सुरक्षितं स्थापयिष्यते। अपि च, राजस्वन्यायालयैः पारितानाम् आदेशानां गुणवत्तायाः नियमित- समीक्षार्थं विशेषप्रकोष्ठस्य गठनाय निर्देशः प्रदत्तः अस्ति। श्रवणस्य तिथेः समयस्य च सूचना लघुसन्देशैः, दूरभाषसम्पर्कमाध्यमेन तथा अन्यैः उपायैः पक्षकारेभ्यः प्रेषयिष्यते। निःसन्देहम्, अयम् उपक्रमः अङ्कीयप्रशासनस्य दिशि सकारात्मकं पदम् अस्ति। विशेषतः ग्रामीणक्षेत्रेषु दूरस्थप्रदेशेषु च निवसतां जनानां तथा आर्थिकदृष्ट्या दुर्बलवर्गाणां कृते अनेन समयस्य धनस्य च व्ययः न्यूनीभवितुं शक्नोति। अनावश्यकयात्रायाः परिहारोऽपि सम्भविष्यति।

तथापि, अस्याः व्यवस्थायाः वास्तविकं साफल्यं केवलम् अन्तर्जालमाध्यमेन श्रवणस्य आरम्भेण न, अपि तु तस्य समुचितेन प्रभाविणा च कार्यान्वयनेन एव सुनिश्चितं भविष्यति। ग्रामीणक्षेत्रेषु अन्तर्जाल- सुविधायाः उपलब्धता, अङ्कीयज्ञानस्य प्रसारः, तान्त्रिकसहायता, लेखपत्राणां प्रामाणिकता, समयबद्धश्रवणं च इत्येतेषु विषयेषु सम्यक् ध्यानं दातव्यम्।

अन्ततः, प्रौद्योगिक्याः उद्देश्यं केवलं प्रशासनिक- व्यवस्थायाः अङ्कीयकरणं न भवेत्, अपि तु सामान्यनागरिकाणां कृते न्यायिकप्रक्रियां सरलां, पारदर्शिनीं, उत्तरदायित्वपूर्णां सुलभां च कर्तुम् एव भवेत्। यदि एषा व्यवस्था व्यवहारक्षेत्रे प्रभाविणा प्रकारेण कार्यान्विता भवति, तर्हि बिहारराज्ये भूमिसम्बद्धानां राजस्वविषयकानां च विवादानां निराकरणप्रक्रियायां उल्लेखनीयः सुधारः सम्भविष्यति।

उत्तरप्रदेशस्य गौरवशाली पुलिसध्वजस्य शौर्यपरम्परायाः च सम्माननम्- मुख्यमन्त्री योगी आदित्यनाथाय ध्वजचिह्नं समर्पितम्

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ, २३ नवम्बरः। अद्य नवम्बरमासस्य त्रयोविंशतितमे दिनाङ्के 'पुलिसध्वजदिवसस्य' पावनावसरे उत्तरप्रदेशस्य पुलिसमहानिदेशकः राजीवकृष्णः माननीयाय मुख्यमन्त्रिणे श्रीयोगी आदित्यनाथाय तस्य निवासस्थाने पुलिसध्वजस्य प्रतीकचिह्नं धृतवान्। अस्मिन् गरिमामये अवसरे अपरमुख्यसचिवः (गृहविभागः) सञ्जयप्रसादः, अपरपुलिसमहानिदेशकः (विधिव्यवस्थाविभागः) अमिताभयशः, पुलिसमहानिदेशकस्य विशेषकार्याधिकारी के० एस० इमैन्युअलः अपि उपस्थिताः आसन्।

उत्तरप्रदेशपुलिसस्य ध्वजः अस्माकं गौरवशालिन्याः परम्परायाः, अदम्यसाहसस्य, अतुलनीयशौर्यस्य, अनुशासनस्य, कर्तव्यनिष्ठायाश्च गौरवपूर्णं प्रतीकम् अस्ति। अयं ध्वजः पुलिसबलस्य त्यागस्य, समर्पणस्य, जनसेवायाः च उज्ज्वलां गाथां स्मारयति। पुलिसध्वजदिवसः शौर्यस्य, सेवायाः, समर्पणस्य च गौरवमयी परम्परायाः स्मरणोत्सवः अस्ति।

सिद्धार्थनगरजनपदे

नवम्बरमासस्य षड्विंशे दिनाङ्के सामूहिकविवाहसमारोहः आयोजयिष्यते

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्, नवम्बरमासः २०२६। उत्तरप्रदेशसर्वकारस्य 'मुख्यमन्त्री- सामूहिक-विवाहयोजनायाः' अन्तर्गतं सिद्धार्थनगरजनपदे नवम्बरमासस्य षड्विंशे दिनाङ्के (गुरुवासरे) भव्यः सामूहिक- विवाहसमारोहः आयोजयिष्यते। अयं समारोहः जिलाकारागारस्य सम्मुखे स्थिते क्रीडाङ्गणे भविष्यति। अस्मिन् समारोहे २२४ युगलानां विवाहसंस्कारः वैदिकरीत्या सम्पन्नः कारयिष्यते।

जिलाधिकारी गौरवसिंहसोगरवालः समारोहस्य सफलायोजनायै विभिन्नेभ्यः विभागेभ्यः सम्बद्धेभ्यः अधिकारिभ्यः दायित्वानि प्रदत्तवान् अस्ति। अपरजिलाधिकारी अस्य कार्यक्रमस्य मुख्यसमन्वयकः भविष्यति।

समारोहस्य प्रमुखाः व्यवस्थाः-


भोजनमण्डपव्यवस्था च- समारोहस्थले विशालस्य पण्डालस्य, विवाहमण्डपस्य, वेदिकायाः भोजनस्य च समुचिता व्यवस्था भविष्यति। भोजनस्य शुद्धतायाः परीक्षणमपि सम्बन्धितैः अधिकारिभिः क्रियते।

विवाहसंस्कारः उपहारवितरणं च- विवाह- संस्कार-सम्पादनाय पुरोहितानां धार्मिकाचार्याणां च व्यवस्था कृता अस्ति। सर्वकारपक्षतः सर्वेभ्यः नवदम्पतिभ्यः उपहारसामग्री अपि प्रदास्यते।

सुरक्षास्वच्छताव्यवस्था च- समारोहस्थले शान्तिसुरक्षायाः दायित्वं पुलिसप्रशासनं निर्वक्ष्यति। नगरपालिकया स्वच्छता, पेयजलम्, चलशौचालयानां च व्यवस्था क्रियते।

चिकित्साग्निशमनव्यवस्था च- आकस्मिक-चिकित्सासेवायै चिकित्सायानम्, अग्निशमन-व्यवस्थापि समारोहस्थले सज्जा स्थास्यति। नवदम्पतिभ्यः स्वास्थ्यसम्बद्धा सामग्री अपि वितरिष्यते। जिलाधिकारी सर्वेभ्यः सम्बन्धितेभ्यः अधिकारिभ्यः परस्परसमन्वयेन सहयोगभावनया च स्वदायित्वनिर्वहणस्य निर्देशं प्रदत्तवान्, येन समारोहः सुव्यवस्थितरूपेण सफलतया च सम्पन्नः भवेत्।

संस्कृतशिक्षण-सम्भाषणप्रशिक्षणस्य निरन्तरं पञ्चाशत्तमस्य सुवर्णशिविरस्य समापनसमारोहः



आधुनिको भव, संस्कृतं वद' अभियानान्तर्गतं दश-दिवसीयस्य अन्तर्राष्ट्रीयस्य अन्तर्जालीय- शिविरस्य समापनम्

हिमसंस्कृतवार्ता राघव नाथ झा, पटना।

बिहारसंस्कृतसञ्जीवनसमाजस्य, पाटलिपुत्रस्य तत्त्वावधाने 'आधुनिको भव, संस्कृतं वद' इत्यभियानान्तर्गतं आयोजितस्य निरन्तरं पञ्चाशत्तमस्य अन्तर्राष्ट्रीयस्य अन्तर्जालीयस्य दशदिवसीयस्य संस्कृतशिक्षण- सम्भाषण-प्रशिक्षणस्य सुवर्णशिविरस्य समापनसमारोहः संस्कृतमयेन वातावरणेन सम्पन्नः।

अभियानस्य प्रधानसंरक्षकः उत्तरप्रदेशशासनस्य पूर्वगृहसचिवः डॉ. अनिलकुमारसिंहः उद्घाटनसम्बोधने पुरुषार्थचतुष्टयस्य, षष्ठीमातुः, देवोत्थानैकादश्याः तुलसीविवाहस्य च महत्त्वं विस्तरेण प्रतिपादितवान्। भारतीयसंस्कृतौ पर्वणां वैज्ञानिकता सिद्धा इति सः अवदत्। 'आत्मदीपो भव' इत्येषः सन्देशः भारतीयसंस्कृतेः परिचायकः अस्ति। स्वाध्याये प्रवचने च कदापि अहङ्कारः न भवेत्। अध्यात्मज्ञानस्य माध्यमेन एव मनुष्यः ईश्वरप्राप्तौ सफलः भवति। तुलसी मोक्षप्रदायिनी कथिता अस्ति; तुलसीदलमन्तरेण ईश्वरः अपि प्रसादं न स्वीकरोति इति सः प्रतिपादितवान्।

अस्मिन्नवसरे डॉ. अनिलकुमारसिंहस्य जन्मदिवसः षष्ठीमातुः स्मरणेन सह विशेषतया समायोजितः। उपस्थितैः विद्वद्भिः सदस्यैश्च तस्य शतायुषः कामना कुर्वद्भिः जन्मदिवसस्य शुभकामनाः समर्पिताः। अध्यक्षीयभाषणे डॉ. मुकेशकुमारओझा सर्वान् सदस्यगणान् ६ दिसम्बरदिनाङ्के दिल्लीस्थे दौलतराम-महाविद्यालये आयोज्यमाने दीक्षान्तसमारोह-संस्कृतसाधकसम्मानकार्यक्रमे उपस्थितुं साग्रहम् आहूतवान्। तेन 'सङ्घे शक्तिः' इति सन्देशः अपि प्रदत्तः।अस्मिन्नवसरे अभियानस्य राष्ट्रिय-संयोजिका प्रो. रागिनीवर्मा, राष्ट्रियोपाध्यक्षा डॉ. लीनाचौहानः, संरक्षकौ डॉ. अनिलकुमारचौबे तथा श्रीमहेशमिश्रः, राष्ट्रियकार्यकारिण्याः सदस्याः डॉ. एकतावर्मा, डॉ. दीप्तिकुमारी, डॉ. नीराकुमारी च षष्ठीमातुः सूर्यदेवस्य च महत्त्वं प्रतिपादितवन्तः। अस्मिन्नेवावसरे 'षष्ठीमातुः स्मृतौ संस्कृत- सम्भाषण- प्रतियोगिता' आयोजिता। प्रतियोगितायां प्रथमपुरस्कारः डॉ. देवेशप्रकाशआर्याय, डॉ. दीप्तिकुमार्यै मनीषकुमाराय च प्रदत्तः। द्वितीयपुरस्कारः तारावि‌श्वकर्मणे, वन्दनापटेरियायै डॉ. रम्भाकुमार्यै च, तृतीयपुरस्कारः मुरलीधरशुक्लाय, बीजेन्द्रसिंहाय उमाहेनोते च प्रदत्तः। संस्कृतभाषया षष्ठीमातुः विषये उत्कृष्टविचारप्रस्तुत्यर्थं राहुलकुमाराय, डॉ. डिम्पलायै, शिवान्यै डॉ. अर्चनात्रिपाठिने च विशेषपुरस्काराः प्रदत्ताः। आगतानाम् अतिथीनां स्वागतं डॉ. एकतावर्मा कृतवती। कार्यक्रमस्य संस्कृतभाषया सञ्चालनं धन्यवादज्ञापनं च डॉ. लीनाचौहानः कृतवती। ऐक्यमन्त्रस्य प्रस्तुतीकरणं तारावि‌श्वकर्मणा कृतम्। प्रो. रागिनीवर्मा शिविरस्य सर्वान् प्रतिभागिनः 'आधुनिको भव, संस्कृतं वद' अभियानस्य सफलसञ्चालने सहयोगं कर्तुं समाहूतवती। डॉ. अनिलकुमारचौबे संस्कृतभाषया विरचितं जन्मोत्सव- शुभकामनागीतं प्रस्तुत्य उपस्थितान् सर्वान् मन्त्रमुग्धान् अकरोत्। एवं संस्कृतशिक्षणेन सम्भाषणाभ्यासेन च समन्वितस्य सुवर्णशिविरस्य समापनं संस्कृतभाषायाः प्रचारप्रसारस्य सङ्कल्पेन सम्पन्नम्।

योगासनस्पर्धायां डी.ए-वी. महाविद्यालयस्य उत्कृष्टं प्रदर्शनं, दश पदकानि अर्जितानि



हिमसंस्कृतवार्ताः- प्रांजल कानपुरम्, उत्तरप्रदेशः। केम्ब्रिज-हाईस्कूल (सिविल लाइन्स) आयोजितायां उत्तरप्रदेश- योगासन- क्रीडासङ्घस्य सप्तम्यां राज्यस्तरीयायां स्पर्धायां डी.ए-वी. महाविद्यालयस्य (कानपुरम्) योग-डिप्लोमा-प्रशिक्षुभिः अतीव उत्साहेन उत्कृष्टप्रदर्शनेन च समग्रतया दश पदकानि- अष्ट सुवर्णपदकानि द्वे रजतपदकानीति प्राप्य ऐतिहासिकी सफलता अर्जितास्ति। अस्यां गौरवपूर्णोपलब्धौ आशीषकुमारः, विजयकुमारयादवः, उमादेवी, सोनायादवः, आञ्चलकुशवाहा, कुमारीरोज, कौमुदीयादवः, अनसूयासिङ्घानिया च सुवर्णपदकानि लब्ध्वा यशः प्रसारितवन्तः, प्रांजल, आशीषकुमारः (नीरू) च रजतपदकं प्राप्तवन्तौ। प्रशिक्षूणामस्यां प्रशंसनीयायां प्रेरणादायिकायां च विजये महाविद्यालयस्य प्राचार्यः प्रो. मनोजजौहरी, संस्कृतविभागाध्यक्षः प्रो. विनोदकुमारपाण्डेयः, वरिष्ठप्राध्यापकः प्रो. जे. पी. श्रीवास्तवः, मुख्यप्रॉक्टरः प्रो. लोकेशसक्सेना, एन.एस.क्यू.एफ. नोडल-अधिकारी प्रो. जितेन्द्रमोहनः, ऐ.क्यू.ए.सी. समन्वयकः प्रो. सुरेन्द्रप्रतापसिंहः, डी.एस.डब्लू. प्रो. पङ्कजटण्डनः, डिप्लोमा-इन-यौगिक-साइंस इत्यस्य समन्वयकः डॉ. सवितुरप्रकाशगङ्गवारः, योगप्रशिक्षिका श्रीमती कञ्चनगुप्ता एते सर्वे आचार्याः अधिकारिणश्च सर्वेभ्यः विजेतृभ्यः सहर्षमभिनन्दनं, उज्ज्वलभविष्यस्य शुभाशयान् च दत्तवन्तः।

गङ्गायाः निर्मलता भारतीयसंस्कृतेः मानवतायाश्च आत्मनः संरक्षणम् वर्तते- प्रो. बिहारीलालशर्मा





हिमसंस्कृतवार्ताः- चन्दौली।

पश्चिमवाहिनीमातागङ्गायाः पावनतटे स्थिते बलुआघाटे भारतीय- ज्ञानपरम्पराकेन्द्रस्य, सम्पूर्णानन्द-संस्कृत- विश्वविद्यालयस्य, वाराणसी इत्यस्य, गङ्गासेवासमितेः, बलुआ इत्येतेषां संयुक्ततत्त्वावधाने द्विवसीयायाः राष्ट्रियसङ्गोष्ठ्याः 'ग्रामस्य गङ्गा- संरक्षणं विकासश्च' इत्यस्याः भव्यम् उद्घाटनं जातम्। समारोहस्य मुख्यातिथिः विश्वविद्यालयस्य कुलपतिः प्रो. बिहारीलालशर्मा तथा मुख्यवक्ता प्रान्तीयसहकार्यवाहः प्रो. राकेशतिवारी आसीत्। कार्यक्रमे प्रो. दिनेशगर्गः, डॉ. विजयकुमारशर्मा, डॉ. आशीषमणित्रिपाठी, डॉ. ज्ञानेन्द्रसापकोटा इत्येतैः सह अनेके विद्वांसः, शिक्षाविदः विद्यार्थिनश्च उपस्थिताः आसन्। मुख्यातिथिना प्रो. बिहारीलालशर्मणा उक्तं यत् गङ्गायाः निर्मलता केवलं नद्याः संरक्षणं न, अपि तु भारतीयसंस्कृतेः, राष्ट्रियायाः अस्मितायाः, मानवतायाः आत्मनश्च संरक्षणम् अस्ति। आगच्छन्त्यः सन्ततयः गङ्गायाः महिमानं तदैव अनुभवितुं शक्नुवन्ति, यदा वयं तस्याः अविरलतां निर्मलतां च सुरक्षितं रक्षिष्यामः। केवलं दीपप्रज्वलनं न पर्याप्तम्, अपि तु गङ्गायां अवकर- अपशिष्टान् अप्रवाहनस्य सङ्कल्पः करणीयः। गङ्गायाः स्वच्छतायाः वास्तविकः आरम्भः अस्माकम् एव आचरणस्य निर्मलतायाः भवेत्। तेन भारतीयज्ञानपरम्परायाः उल्लेखं कुर्वता उक्तं यत् भारतं ज्ञानस्य, साधनायाः, उपासनायाः आध्यात्मिकचेतनायाश्च भूमिः अस्ति। अस्माकं संस्कृतिना नद्यः मातृरूपेण प्रकृतिश्च देवतारूपेण स्वीकृताः सन्ति। जलस्य अन्नस्य च शुद्धतया शरीरम्, शरीरस्य शुद्धतया चिन्तनम्, चिन्तनस्य शुद्धतया च समाजस्य राष्ट्रस्य च कल्याणं सम्भवम् अस्ति। तेन विद्यार्थिभ्यः गङ्गासंरक्षणस्य सन्देशं ग्रामं, वीथिं समाजं च प्रति प्रेषणस्य तथा कथनी-कार्ययोः एकरूपतायाः आनयनस्य आह्वानं कृतम्।

गङ्गां मात्रा सह स्वपुत्रीमपि मत्वा तस्याः संरक्षणस्य संवर्धनस्य च सङ्कल्पः करणीयः

मुख्यवक्त्रा प्रो. राकेशतिवारिणा उक्तं यत् गङ्गा केवलं एका जलधारा न, अपितु प्रत्येकं भारतीयस्य हृदये प्रवहमाना सांस्कृतिकी चेतना अस्ति। गङ्गां केवलं मातरं मननम् अपर्याप्तम्, अपि तु स्वपुत्रीवत् तस्याः पालनपोषणं संरक्षणं च करणीयम्। तेन लोकगीतैः, लोकभाषया भारतीयपरम्पराभिः च जनजीवने गङ्गायाः आत्मीया उपस्थितिः रेखांकिता। तेन उक्तं यत् गङ्गायाः श्रद्धा तदैव सार्थका भविष्यति, यदा अस्माकम् अन्तःकरणम् अपि निर्मलं भविष्यति। नूतनायै सन्तत्यै भारतीयपरम्पराणां वैज्ञानिकं तार्किकं च पक्षं बोधनं तथा गङ्गासंरक्षणं जनसङ्कल्पं जनान्दोलनं च करणं समयस्यावश्यकता अस्ति। अध्यक्षीयसम्बोधने आचार्य-सन्तत्रिपाठिना गङ्गायाः सांस्कृतिकमहत्तायां सामाजिकोत्तरदायित्वे च प्रकाशं पातयित्वा उक्तं यत् एतादृशानि आयोजानानि समाजे पर्यावरणसंरक्षणस्य सकारात्मक-चेतनायाश्च प्रसारस्य प्रभाविनः माध्यमाः सन्ति। कार्यक्रमे वक्तृभिः भारतीय- ज्ञान-परम्परायाः, जलसंस्कृतेः, ग्राम्यजीवनस्य पर्यावरणसंरक्षणस्य च पारस्परिकसम्बद्धेषु विचाराः व्यक्ताः। ग्रामेभ्यः विद्यार्थिभ्यश्च गङ्गां प्रदूषणमुक्तां कर्तुं जलस्रोतसां संरक्षणस्य च सङ्कल्पं ग्रहीतुम् आह्वानं कृतम्। अन्ते पूर्वप्राचार्येण राजेन्द्रपाण्डेयेन आभारः ज्ञापितः। तेन आयोजनस्य सप्तदशवर्षेभ्यः प्रचलमानायाः परम्परायाः उल्लेखं कृत्वा सर्वेभ्यः अतिथिभ्यः, विद्वद्भ्यः, शिक्षकेभ्यः, आयोजकेभ्यः विद्यार्थिभ्यश्च आभारः व्यक्तः। उद्घाटनसत्रानन्तरं शोधपत्रवाचनम् अकादमिकविमर्शश्च अभवताम्, सायङ्काले च कविसम्मेलनस्य आयोजनं निर्धारितम्।

सम्पूर्णस्य आयोजनस्य मूलसन्देशः एषः आसीत् यत् गङ्गासंरक्षणं केवलं नद्याः स्वच्छतायाः विषयः न, अपि तु भारतीयसंस्कृतेः, प्रकृतेः, ग्राम्यजीवनस्य भाविसन्ततीनां सुरक्षितभविष्यस्य च सामूहिकः सङ्कल्पः अस्ति।

छत्तीसगढ़- संस्कृत- विद्यामण्डलस्य माननीयः अध्यक्षः राजेशराजपूतमहोदयः समुपस्थितः अभवत्

श्री विद्या वेद संस्कृत पाठशाला इत्यत्र कार्यक्रमे मुख्यातिथिरूपेण अध्यात्मकेन्द्रस्य प्रचारकः, हथनीकलानिवासी श्रीपीताम्बरठाकुर-महोदयः विराजमानः अभवत्। विशिष्टातिथिरूपेण संस्कृतभारती-छत्तीसगढ़प्रान्तस्य विद्यालयकार्य-प्रमुखः, धमतरीनिवासी होमेश्वरप्रसादचन्द्राकर-महोदयस्य सान्निध्यमपि प्राप्तम्। अस्मिन् गरिमामये अवसरे आचार्यः मनीषकुमारभार्गव-महोदयः, आचार्यः कृष्णनारायणपाठकमहोदयः, आचार्यः रीतेशयादवमहोदयः, आचार्यः उज्ज्वलदुबे महोदयः, आचार्यः मोरध्वजसाहूमहोदयः, आचार्यः भरतध्रुवमहोदयः, आचार्यः नरेशध्रुवमहोदयः इत्यादयः अनेकाः आचार्यवर्याः, गणमान्यजनाः च उपस्थिताः आसन्। समस्तानां विशिष्टातिथीनाम् आचार्यवर्याणां च गरिमामय्या उपस्थित्या कार्यक्रमस्य शोभा महत्ता च अधिकतया वर्धिता। तेषां प्रेरणादायकस्य सान्निध्यस्य मार्गदर्शनस्य च माध्यमेन विद्यालयपरिवारः नवीनाम् ऊर्जाम्, उत्साहं मार्गदर्शनं च प्राप्तवान्। समस्तेभ्यः अतिथिभ्यः आचार्यवरेभ्यश्च हार्दिकं स्वागतम् अभिनन्दनं च।



विकसितभारतस्य निर्माणसङ्कल्पेन युवशक्तेः हुंकारः, मधुबन्यां जनपदस्तरीय- युवसंसदस्य आयोजनम्



शारदा झा प्रथमस्थाने, अङ्किता झा द्वितीये, अनुरागकुमारश्च तृतीये; राज्यस्तरीय- प्रतियोगितायै त्रयाणां प्रतिभागिनां चयनम्

हिमसंस्कृतवार्ता राघव नाथ झा, मधुबनी।

मधुबनीस्थस्य 'माय भारत' केन्द्रस्य तत्त्वावधाने 'विकसितभारताय व्यसनमुक्ताः युवानः' इति विषयमधिकृत्य जनपदस्तरीयस्य 'विकसित- भारतयुवासंसदः- २०२७' इति कार्यक्रमस्य आयोजनं मधुबनीस्थे क्रीडाभवने कृतम्। अस्यां प्रतियोगितायां शारदा झा प्रथमस्थानं, अङ्किता झा द्वितीयस्थानं, अनुरागकुमारश्च तृतीयस्थानं प्राप्तवन्तः। एते त्रयः प्रतिभागिनः राज्यस्तरीय- प्रतियोगितायै चयनिताः।

कार्यक्रमस्य मुख्यातिथिः सांसदः अशोकयादवः अवदत् यत् २०४७ तमे वर्षे विकसितभारतस्य सङ्कल्पं साकारयितुं आधारभूतसंरचनायाः प्रौद्योगिक्याः च विकासेन सह स्वस्थानां, शिक्षितानां, व्यसनमुक्तानां, जागरूकानाम् उत्तरदायिनां च युवानां महती आवश्यकता अस्ति। युवशक्तिः राष्ट्रस्य महत्तमं धनम् अस्ति। व्यसनाधीनतया युवानां प्रतिभायाः, कार्यक्षमतायाः, सृजनशीलतायाः राष्ट्रनिर्माणे योगदानस्य च हानिः भवति।

व्यसनमुक्तः युवा परिवारस्य प्रति उत्तरदायी, समाजस्य प्रति संवेदनशीलः, राष्ट्रस्य प्रति स्वकर्तव्येषु च जागरूकः भवति। अतः युवानः स्वशक्तिं व्यसने विनाशयितुं विहाय शिक्षायां, क्रीडायां, आजीविकोपार्जने, नवाचारकार्येषु, समाजसेवायां राष्ट्रविकासे च विनियुञ्जीरन्। व्यसनमुक्तभारतस्य निर्माणं केवलं शासनस्य दायित्वं न, अपि तु प्रत्येकस्य युवजनस्य सहभागितापि अनिवार्या अस्ति।

विशिष्टातिथिः विधानपरिषदः सदस्यः घनश्यामठाकुरः युवानः सकारात्मक-चिन्तनाय, सामाजिक- सहभागितायै नेतृत्वक्षमतायाः विकासाय च प्रेरितवान्। एतादृशाः कार्यक्रमाः युवभ्यः स्वप्रतिभायाः विचाराणां च अभिव्यक्तये अवसरान् प्रददति तथा तेषां सर्वाङ्गीणविकासे महत्त्वपूर्णां भूमिकां निर्वहन्ति इति सः अवदत्।

अध्यक्षीयसम्बोधने जनपदयुवाधिकारी अमरेन्द्रकुमारः अमरः प्रतियोगितायाः महत्त्वं प्रतिपादितवान्, चयनितानां त्रयाणां प्रतिभागिनां राज्यस्तरीय- प्रतियोगितायां भागग्रहणस्य सूचना दत्तवान्।

'माय भारत' इत्यस्य अन्तर्जालीयपटलस्य माध्यमेन शताधिकैः युवभिः पञ्जीकरणं कृतम् आसीत्। तेषु सप्तचत्वारिंशत् प्रतिभागिनः स्वविचारान् वाक्पाटवं च प्रस्तुतवन्तः। निर्णायकमण्डले समाजसेवी देवेन्द्रयादवः, जनपदपरियोजनाधिकारी आनन्द अङ्कितः, समाजसेवी प्रशान्तकुमारः, प्रो. वागीशकान्तझा, अभियन्ता समाजसेवी चन्द्रवीरकुमारश्च सदस्याः आसन्। निर्णायक-मण्डलेन प्रतिभागिनां प्रस्तुतयः, विचाराः विषयस्य अवबोधश्च सम्यक् परीक्षिताः। प्रतियोगितायां विजेतृभ्यः स्मृतिचिह्नानि, प्रमाणपत्राणि सम्मानवस्त्राणि च प्रदाय सम्मानिताः।

कार्यक्रमस्य सञ्चालनं साक्षीकुमारी तथा कोमलकुमारी संयुक्तरूपेण कृतवत्यौ, धन्यवादज्ञापनं च सक्सेनाकुमारेण कृतम्। कार्यक्रमस्य सफलायोजने 'माय भारत' केन्द्रस्य ललितकुमारझा, मुकेशकुमारझा, आशीषझा इत्येतेषां स्वयंसेवकानां प्रतिभागिनां च महत्त्वपूर्णं योगदानम् आसीत्। युवशक्तेः रचनात्मक- विनियोगेन व्यसनमुक्तसमाजस्य विकसितराष्ट्रस्य च निर्माणमेव अस्य युवासंसदः प्रमुखः सन्देशः आसीत्।



हिमसंस्कृतवार्ताः, ईदरधीरजः

वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य प्रथमा तन्त्रज्ञान-वार्ता अतीव रोचिका अस्ति। गणितशास्त्रे प्रसिद्धा 'रीमन-परिकल्पना' चिरकालम् असमाधाना स्थिता। परं ह्यः 'एन्थ्रोपिक्'-संस्थायाः गणितज्ञेन लेवेण्टेन 'क्लॉड्'-नाम्ना कृत्रिम-बुद्ध्या सह तस्याः समाधानं कृतम् इति उद्घोषितम्। तस्य प्रमाणस्य कृते सङ्गणक-सङ्केतस्य बहु-लक्ष-सङ्ख्याकाः पङ्क्तयः लिखिताः, सार्ध-द्विलक्ष-पृष्ठः लेखः च प्रकाशितः। किन्तु ततः किञ्चित्-कालानन्तरम् एव 'स्टैन्फोर्ड'-विश्वविद्यालयस्य अलेसान्द्रवा अपि चत्वारिंशदधिक-नवशत-पृष्ठः प्रमाण-ग्रन्थः प्रकाशितः। तस्मिन् ग्रन्थे कृत्रिम-बुद्धेः साहाय्यं न गृहीतम्, अपितु केवलं मानवैः एव सः रचितः इति तेन उक्तम्।

काव्या- अहो! मानव-बुद्धेः कृत्रिम-बुद्धेः च मध्ये महती स्पर्धा प्रवृत्ता इति दृश्यते। गणितज्ञेषु तु महान् वादः उत्पन्नः खलु! इदानीम् अपरां तन्त्रज्ञान-वार्तां शृणु। 'सिग्रल'-सन्देश-तन्त्रांशेन अद्य दूरवाग्-यन्त्रेषु पटल-चित्र-ग्रहणम् (Screenshot) निरुद्धम्। एतत् किमर्थं कृतम् इति जानासि किम्? यन्त्रेषु स्थिताः कृत्रिम-बुद्धि-सहायकाः (AI agents) उपयोक्तॄणां पटलानि पश्यन्ति, गुप्त-सन्देशान् च पठन्ति। एतेन जनानां गोपनीयतायाः कृते महत् सङ्कटम् उत्पन्नम् इति 'सिग्रल'-संस्थया उक्तम्। अतः रक्षणाय एषः उपायः कृतः।

नन्दिनी- सत्यम् एतत्। गोपनीयतायाः रक्षणाय अयं समुचितः निर्णयः स्वीकृतः। अथ सङ्गणक-क्रीडा-जगतः एका महती वार्ता अस्ति। बहु-प्रतीक्षिता 'जी-टी-ए-षष्ठम्' (GTA VI) इति विडियो-क्रीडा ह्यः लोकाय अर्पिता। प्रथम-दिने एव अस्याः विक्रयेण अशीत्यधिक-त्रिशत-कोटि-डॉलर्-परिमितं धनं लब्धम्। अनेन विक्रयेण सर्वाणि पूर्व-कीर्तिमानानि भग्नानि। किन्तु बहुभिः जनैः युगपत् क्रीडा अवतारिता, अतः 'प्लेस्टेशन्'-जाल-सेवायाम् अवरोधः जातः, सेवा च किञ्चित्-कालं विच्छिन्ना।

काव्या- अद्भुतम्! एकस्याः सङ्गणक-क्रीडायाः कारणेन जाल-सेवा एव विच्छिन्ना इति विचित्रं खलु! सङ्गणक-क्रीडा-प्रेमवताम् उत्साहः असीमः दृश्यते। इदानीं मम पार्श्वे एका अतीव विचित्रा विज्ञान-वार्ता अस्ति। सामुद्र-अन्वेषकैः दूरात्-नियन्त्रित-जल-यानेन गभीर-समुद्रस्य तले प्राचीन-भग्न-नौकाः अन्विष्टाः। किन्तु तत्र भग्न-नौकानां स्थाने बहु-सङ्ख्यानि वस्त्र-क्षालन-यन्त्राणि दृष्टानि। मन्ये, एतानि यन्त्राणि भारवाह-नौकाभ्यः समुद्रे पतितानि। आश्चर्यं तु एतत् यत् तानि यन्त्राणि इदानीं प्रवालैः आवृतानि, गभीर-जल-मत्स्यानां च नूतनानि वास-स्थानानि जातानि!

नन्दिनी- हह, एषा वार्ता तु अतीव विचित्रा! मानवैः त्यक्तेषु तेषु यन्त्रेषु अपि सामुद्र-जीवैः स्व-गृहाणि निर्मितानि। प्रकृतिः सर्वत्र जीवनं रक्षति एव! काव्ये, एतासाम् अद्भुत-वार्तानां कथनाय कृतज्ञताम् अर्पयामि तुभ्यम्। सर्वेभ्यः श्रोतृभ्यः नमः। शुभं भूयात्!

कार्तिकपूर्णिमा : बिहारस्य नदीसंस्कृतेः, लोकश्रद्धायाः, वैज्ञानिकचेतनायाः सामा-चकेवापर्वणः समापनस्य च महोत्सवः



गङ्गास्नानं, दीपदानं, सोनपुरस्य हरिहरक्षेत्रमेला, खगोलीय-घटनाश्च; मिथिलायाः लोक-परम्परायां भ्रातृभगिन्योः स्नेहस्य विशिष्टः पर्वोत्सवः

विशेषलेखः- डॉ. राघव नाथ झा

बिहारप्रदेशे कार्तिकपूर्णिमा न केवलं धार्मिकानुष्ठानस्य पर्व, अपितु नदीसंस्कृतेः, लोकश्रद्धायाः, वैज्ञानिकचेतनायाः, सामाजिकसमरसतायाश्च महत्त्वपूर्णः सांस्कृतिकमहोत्सवः अस्ति। २०२६ तमस्य वर्षस्य नवम्बरमासस्य २४ दिनाङ्के मङ्गलवासरे कार्तिकशुक्लपूर्णिमा आचरिष्यते। पञ्चाङ्गानुसारं पूर्णिमातिथिः रात्रौ ९ वादनं २२ निमेषपर्यन्तं प्रवर्तते। कृत्तिकानक्षत्रं परिघयोगश्च अस्यां तिथौ वर्तेते। भद्रा (विष्टिकरणम्) प्रातः ८ वादनं ५४ निमेषपर्यन्तं भवति। अतः मिथिलायाः परम्परानुसारं सामा-चकेवायाः विसर्जनं प्रातः ८ वादनं ५४ निमेषात् पूर्वं पूर्वाभिमुखं कृत्वा करणीयम्।

मिथिलायाः प्रसिद्धं सामा-चकेवापर्व अस्मिन्नेव दिने भावपूर्णतया समापनं प्राप्नोति। भगिन्यः सामा-चकेवायाः प्रतिमाभिः विविधैः लोकप्रतीकैश्च सह लोकगीतानि गायन्त्यः स्वभ्रातॄणां कल्याणाय मङ्गलकामनां कुर्वन्ति। एषा परम्परा भ्रातृभगिन्योः स्नेहस्य, पारिवारिकात्मीयतायाः, स्त्रीप्रधानलोकसंस्कृतेश्च अनुपमा अभिव्यक्तिः अस्ति। सामायाः विदायः वस्तुतः लोकभावनानां, पारिवारिकसम्बन्धानां, सांस्कृतिकस्मृतीनां च उत्सवः अस्ति। अस्मिन् पर्वणि भगिनीनां स्नेहः, भ्रातॄणां मङ्गलकामना, लोकगीतानां माधुर्यं च मिथिलायाः सांस्कृतिकजीवनं विशिष्टया भावधारया समृद्धं कुर्वन्ति।

अस्मिन्नवसरे गङ्गा, गण्डकी, कोसी, कमला, बागमती इत्यादीनां नदीनां तटेषु स्थितेषु घाटेषु स्नानस्य, दानस्य, दीपप्रज्वालनस्य च परम्परा अनुवर्तते। सोनपुरस्य ऐतिहासिकः हरिहरक्षेत्रमेला धार्मिकश्रद्धायाः, ग्रामीणार्थव्यवस्थायाः, लोकसंस्कृतेश्च अद्भुतः सङ्गमः अस्ति। भीष्मपञ्चकव्रतस्य समापनम्, देवोत्थानम्, भगवान् कार्तिकेयस्य पूजनम्, गुरुनानकदेवस्य निम्बार्काचार्यस्य च जयन्त्यौ अपि अस्याः तिथेः वैशिष्ट्यम् अभिवर्धयतः।

वैज्ञानिकदृष्ट्या पूर्णिमा चन्द्रस्य तादृशी खगोलीया अवस्था अस्ति, यदा सूर्यः, पृथ्वी, चन्द्रश्च प्रायः एकस्यामेव रेखायां स्थिताः भवन्ति तथा पृथिवी सूर्यचन्द्रयोर्मध्ये भवति। चन्द्रः स्वयम् प्रकाशं न जनयति, अपितु सूर्यस्य प्रकाशं परावर्तयति। पूर्णिमायाम् अमावास्यायां च सूर्यचन्द्रयोः संयुक्तगुरुत्वाकर्षणप्रभावेण समुद्रे ज्वारभाटयोः परासः सामान्यतः अधिको भवति। एषा अवस्था 'बृहज्ज्वारः' (Spring Tide) इति कथ्यते। कार्तिकमासः बिहारप्रदेशे वर्षाकालानन्तरं ऋतुपरिवर्तनस्य कालः अपि अस्ति। वर्षायाः अनन्तरं नदीनां जलप्रवाहे, गादसञ्चये, जलगुणवत्तायां, जलीयपारिस्थितिकतन्त्रे च ये परिवर्तनाः भवन्ति, ते वैज्ञानिकाध्ययनस्य महत्त्वपूर्णाः विषयाः सन्ति। अतः नदीसंस्कृतेः संरक्षणाय नदीनां प्राकृतिकस्वरूपस्य, जलगुणवत्तायाः, पर्यावरणसन्तुलनस्य च वैज्ञानिकम् अवबोधनम् अत्यावश्यकम्।

भगवता शिवेन त्रिपुरासुरस्य वधेन सम्बद्धा पौराणिकी स्मृतिः देवदीपावल्याः माध्यमेन अस्य पर्वणः आध्यात्मिकं महत्त्वम् अभिवर्धयति। अस्मिन्नवसरे मृण्मयदीपानां प्रज्वालनं स्थानीयकुम्भकाराणाम् आजीविकां प्रोत्साहयति। मृण्मयदीपानां प्रयोगेन प्लास्टिकनिर्मितानाम् अनावश्यकसजावटीवस्तूनां उपयोगः न्यूनीकर्तुं शक्यते तथा अपशिष्टपदार्थानां परिमाणमपि न्यूनीकर्तुं शक्यते। एवं पारम्परिककलानां संरक्षणेन सह पर्यावरणहितस्य साधनमपि भवति।

कार्तिकपूर्णिमायाः सन्देशः स्पष्टः अस्ति—आस्था विज्ञानं च परस्परविरोधिनी न स्तः, अपितु प्रकृतेः, संस्कृतेः, मानवीयजीवनस्य च सम्यगवबोधाय उभे महत्त्वपूर्णे आयामे स्तः। बिहारस्य नदीतटेषु प्रज्वलिताः दीपाः, सोनपुरस्य तीर्थपरम्परा, मिथिलायां सामा-चकेवापर्वणः भावपूर्णं समापनं च अस्माकं तस्याः सांस्कृतिकचेतनायाः प्रतीकानि सन्ति, यस्यां आध्यात्मिकता, वैज्ञानिकदृष्टिः, सामाजिकसौहार्दं, पर्यावरणसंरक्षणं च समन्वितरूपेण प्रवहन्ति।

२४ नवम्बर दिनाङ्के भविष्यति ऐतिहासिकः भारतभारीमेला, सज्जताः तीव्रगतिना प्रचलन्ति



हिमसंस्कृतवार्ताःवृजेश कुमार पाण्डेय

सिद्धार्थनगरम्। जनपदस्य ऐतिहासिके धार्मिके च स्थले भारतभारीक्षेत्रे आगामी २४ नवम्बर दिनाङ्के आयोज्यमानस्य वार्षिकमेलस्य सज्जताः तीव्रगतिना प्रचलन्ति। मेलम् आकर्षकं सुव्यवस्थितं च कर्तुं सम्बन्धितैः जनैः सज्जतायाः अन्तिमरूपं प्रदीयते।अस्मिन् मेलके बहुसंख्याकाः श्रद्धालवः तथा समीपवर्तिक्षेत्रेभ्यः आगच्छन्तः जनाः समागमिष्यन्तीति अपेक्षा अस्ति। मेलम् प्रति स्थानीयजनेषु अपि विशेषः उत्साहः दृश्यते।भारतभारीक्षेत्रस्य ऐतिहासिकया सांस्कृतिकया च विशिष्टपरिचित्या सम्बद्धस्य अस्य वार्षिकमेलस्य आयोजनेन सम्पूर्णे क्षेत्रे उत्सवमयी चहलपहलः वर्धमाना अस्ति

वन्दे संस्कृतमातरम्

" लौकिकन्यायकोशः"

" अक्षिपात्रन्यायः"।।(१)



धूलेः कश्चन कणः अपि नेत्रे गतः चेत् नेत्रे पीडा उत्पद्यते। मृदु स्वभावस्य भावनाप्रधानस्य वा जनस्य कृते अल्पा अपि पीडा असहनीया भवति इत्यस्मिन् अर्थे अस्य न्यायस्य प्रयोगः भवति ।

व्याकरणशास्त्राध्ययने सन्धि-तिङन्त-सुबन्तप्रकरणानाम् उपादेयताविषये सप्तदिवसीयायाः अन्तरराष्ट्रीयायाः ई-कार्यशालायाः भव्यः शुभारम्भः



महेन्द्रगढम्,२३ नवम्बर २०२६। हरियाणाकेन्द्रीयविश्वविद्यालयस्य महेन्द्रगढस्थस्य स्वामीदयानन्दसरस्वतीपीठस्य तत्त्वावधाने संस्कृतभाषायाः व्याकरणशास्त्रस्य च गहनाध्ययनम्, अध्यापनम्, अनुसन्धानं च प्रोत्साहयितुं समायोजितायाः सप्तदिवसीयायाः अन्तरराष्ट्रीयायाः ई-कार्यशालायाः शुभारम्भः अद्य विधिवत् अभवत्। अस्यां कार्यशालायां भारतस्य अष्टादशभ्यः राज्येभ्यः त्रिभ्यश्च विदेशेभ्यः प्रतिभागिनः भागं गृहीतवन्तः। मॉरीशसदेशात् प्रो. सत्यपालसिंहस्य विशेषोपस्थितिः कार्यक्रमस्य अन्तरराष्ट्रीयं गौरवं वर्धितवती।

विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. टङ्केश्वरकुमारः तथा माननीयः उपकुलपतिः प्रो. पवनकुमारशर्मा च अस्याः शैक्षणिककार्यशालायाः सफलतायै शुभकामनाः प्रेषितवन्तौ। तौ कार्यशालायाः विषयस्य आयोजनस्य च प्रशंसां कृत्वा संयोजिकायै डॉ. सुमनराण्यै हार्दिकाः शुभाशयाः आशीर्वादं च प्रदत्तवन्तौ।उद्घाटनसत्रे विश्वविद्यालयस्य माननीयस्य कुलसचिवस्य प्रो. सुनीलकुमारस्य गरिमामयी उपस्थितिः आसीत्। तस्य सान्निध्येन कार्यक्रमस्य शोभा अधिका अभवत्। तस्य शैक्षणिकं प्रशासनिकं च मार्गदर्शनम् अस्य आयोजनस्य कृते प्रेरणास्रोतः अभवत्।कार्यशालायाः मुख्यविषयः अस्ति— 'व्याकरणशास्त्रे सन्धि-तिङन्त-सुबन्तप्रकरणानाम् उपादेयता'। इयं कार्यशाला २२ नवम्बरतः २८ नवम्बर २०२६ पर्यन्तं प्रतिदिनं सायं पञ्चवादनतः सप्तवादनपर्यन्तं आयोज्यते। अस्यां विद्वद्भिः व्याकरणशास्त्रस्य विविधेषु विषयेषु व्याख्यानानि शास्त्रीयचर्चाश्च विधास्यन्ते।कार्यक्रमस्य प्रारम्भः भारतीयपरम्परानुसारं सरस्वतीवन्दनया अभवत्। हिमाचलप्रदेशस्य कुमार्या निशया सरस्वतीवन्दनायाः मनोहरा प्रस्तुति कृता। कार्यक्रमस्य कुशलं सञ्चालनम् इन्दिरागान्धीविश्वविद्यालयस्य मीरपुर-रेवाडीस्थस्य सहायकाचार्यया मनीषया कृतम्।तदनन्तरं कार्यशालायाः संयोजिका तथा स्वामीदयानन्दसरस्वतीपीठस्य पीठाध्यक्षा डॉ. सुमनराणी सर्वेषाम् आमन्त्रितानाम् अतिथीनां विदुषां च स्वागतं कृतवती। सा कार्यशालायाः उद्देश्यान्, विषयस्य प्रासङ्गिकतां तथा संस्कृतव्याकरणस्य अध्ययने अनुसन्धानकार्ये च एतेषां प्रकरणानां महत्त्वं च विस्तरेण प्रतिपादितवती।

कार्यशालायाः प्रथमदिने सन्धिप्रकरणे मुख्यवक्तृत्वेन राजकीयमहाविद्यालयस्य लोहारूस्थस्य संस्कृतविभागस्य सहायकाचार्यः डॉ. जयपालशास्त्री व्याख्यानं प्रस्तुतवान्। तेन संस्कृतव्याकरणे सन्धेः स्वरूपं, तस्याः प्रमुखभेदाः, भाषायाः शुद्धतायां तथा अभिव्यक्तौ सन्धेः महत्त्वं च विस्तरेण विवेचितम्। सन्धिः संस्कृतभाषायाः अभिव्यक्तिं सरलां, प्रवाहपूर्णां, सुव्यवस्थितां च करोति इति तेन प्रतिपादितम्।

आगामिदिनेषु तिङन्त-सुबन्तप्रकरणयोः विविधाः सैद्धान्तिकाः व्यावहारिकाश्च विषयाः विशेषज्ञैः विवेचयिष्यन्ते

नवम्बरमासस्य २४-२५ तिथ्योः तिङन्तप्रकरणे महर्षिदयानन्दविश्वविद्यालयस्य रोहतकस्थस्य संस्कृतविभागस्य सहायकाचार्यः डॉ. रविप्रभातः व्याख्यानं प्रदास्यति।सुबन्तप्रकरणमधिकृत्य नवम्बरमासस्य २६-२८ तिथ्योः मॉरीशसदेशस्य महात्मागान्धीसंस्थाने प्रतिनियुक्त्या कार्यरतः वरिष्ठप्राध्यापकः तथा संस्कृतभारतीयदर्शनयोः आई.सी.सी.आर. पीठे समासीनः प्रो. सत्यपालसिंहः व्याख्यानानि प्रदास्यति।एवं च प्रतिभागिनः राष्ट्रिय-अन्तरराष्ट्रीयस्तरस्य विद्वद्वर्ग्यः व्याकरणशास्त्रस्य विविधान् पक्षान् ज्ञातुमवसरं प्राप्स्यन्ति।अस्याः कार्यशालायाः अध्यक्षतां प्रयागराजस्थस्य इलाहाबादविश्वविद्यालयस्य संस्कृत-पालि-प्राकृत-प्राच्यभाषा-विभागस्य सहाचार्यः डॉ. विनोदकुमारः निर्वहति। कार्यशालायाः संयोजनं हरियाणाकेन्द्रीय-विश्वविद्यालयस्य स्वामीदयानन्दसरस्वतीपीठस्य पीठाध्यक्षा डॉ. सुमनराणी करोति।अस्मिन् अवसरे डॉ. सुमनराणी अवदत् यत् संस्कृतव्याकरणं केवलं भाषाशुद्धेः आधारः नास्ति, अपितु भारतीयज्ञानपरम्परायाः संरक्षणस्य, संवर्धनस्य, तस्याः वैज्ञानिकस्वरूपस्य च अवगमनस्य महत्त्वपूर्णं साधनम् अस्ति। पाणिनीयव्याकरणस्य वैज्ञानिकता सूत्रात्मकता च अद्यापि भाषाविज्ञानस्य भाषा-अध्ययनस्य च क्षेत्रे विशेषं महत्त्वं धारयति। एतादृश्यः कार्यशालाः छात्रेभ्यः, शोधार्थिभ्यः, अध्यापकेभ्यश्च शास्त्रीयज्ञानस्य सह व्यावहारिकां अनुसन्धानपरकां च दृष्टिं प्रददति।कार्यक्रमस्य अन्ते संयोजिका डॉ. सुमनराणी उद्घाटनसत्रे उपस्थिताय माननीयाय कुलसचिवाय, शुभकामनाः प्रेषितवद्भ्यां माननीयाभ्यां कुलपतये उपकुलपतये च, सर्वेभ्यः संरक्षकगणेभ्यः, अध्यक्षाय, मुख्यवक्त्रे, कार्यक्रमसञ्चालिकायै, सरस्वतीवन्दनाप्रस्तुतिकर्त्र्यै कुमार्यै निशायै तथा देशविदेशेभ्यः समागतेभ्यः सर्वेभ्यः विद्वद्वर्ग्यः प्रतिभागिभ्यश्च हार्दिकं धन्यवादं ज्ञापितवती।



प्रेषकः - विश्व मोहन झा , दरभंगा

सौराठमहोत्सवे पञ्जीव्यवस्थायाः मिथिलाचित्रकलायाश्च संरक्षणविषये विशिष्टव्याख्यानद्वयम्

मिथिलायाः ऐतिहासिक-सांस्कृतिकधरोहरायाः संरक्षणे संवर्धने च विद्वद्भिः कृतः विचारविमर्शः मधुबनी, नवम्बरमासस्य २३ दिनाङ्कः, २०२६। बिहारशासनस्य कलासंस्कृतिविभागस्य मधुबनीजनपदप्रशासनस्य च संयुक्ततत्त्वावधाने आयोजितस्य सौराठमहोत्सवस्य-२०२६ अन्तर्गतं सोमवासरे विशिष्टव्याख्यानद्वयम् आयोजितम्। प्रथमं व्याख्यानं सरिसबपाहीस्थे लक्ष्मीवतीगुरुकुले 'पञ्जीव्यवस्था' इति विषये, द्वितीयं च सौराठस्थे मिथिलाचित्रकलासंस्थाने 'मिथिलाचित्रकलायाः संरक्षणम्' इति विषये अभवत्।प्रथम-सत्रस्य उद्घाटनं इतिहासविदा श्रीविनयानन्दझा, जनपदकलासंस्कृति-पदाधिकारिणा श्रीनीतीशकुमारेण, गुरुकुल-सञ्चालकेन श्रीरूपेशकुमारझा, श्रीललन-चौधरी तथा श्रीअमलकुमारझा इत्येतैः संयुक्तरूपेण दीपप्रज्वलनं कृत्वा कृतम्। मुख्यवक्ता श्रीविनयानन्दझा मिथिलायाः विशिष्टपरम्परायाः पञ्जीव्यवस्थायाः ऐतिहासिकं सामाजिकं च महत्त्वं प्रतिपादितवान्। सः अवदत् यत् पञ्जीव्यवस्था केवलं वंशावलीनां सङ्कलनं न, अपितु मिथिलायाः प्राचीनसामाजिकव्यवस्थायाः ऐतिहासिकचेतनायाः बौद्धिकपरम्परायाश्च महत्त्वपूर्णः अभिलेखः अस्ति। अस्याः परम्परायाः संरक्षणाय अध्ययनाय च नवपीढेः प्रेरणा आवश्यकी इति सः प्रतिपादितवान्। द्वितीयसत्रस्य उद्घाटनं मिथिलाचित्रकलासंस्थानस्य निदेशकेन डॉ. चन्द्रशेखरप्रसादसिंहेन, जनपदकला-संस्कृतिपदाधिकारिणा श्रीनीतीशकुमारेण, सौराठमहोत्सवसमितेः सचिवेन श्रीशेखरचन्द्रझा, पद्मश्रीबउवादेवी, पद्मश्रीदुलारीदेवी, श्रीशिवनपासवान, संस्थानस्य कनिष्ठप्राचार्यया डॉ. रानीझा, श्रीप्रतीकप्रभाकरः तथा श्रीसञ्जयजायसवालः इत्येतैः संयुक्तरूपेण दीपप्रज्वलनं कृत्वा कृतम्।

गुरुनानकदेवस्य
व्यक्तित्वम्(जयन्तीविशेषः)

डॉ विमलेश झा-डीएवी पब्लिक स्कूल ,बरारी भागलपुर बिहार- ८१२००३।



भारतीयसंस्कृतेः आध्यात्मिकपरम्परायां महापुरुषाणां सन्तानां च महत्त्वपूर्णं स्थानम् अस्ति। तेषु गुरुनानकदेवः एकः महान् सन्तः, समाजसुधारकः, दार्शनिकः, आध्यात्मिकगुरुः च आसीत्। सः सिक्खधर्मस्य प्रवर्तकः तथा प्रथमः गुरुः आसीत्। तस्य व्यक्तित्वं महान् आदर्शैः, आध्यात्मिकचिन्तनैः, मानवतावादेन, प्रेम्णा, करुणया च परिपूर्णम् आसीत्। तेन सम्पूर्णमानवजातये एकता, समानता, भ्रातृत्वं, सदाचारः च इत्येतेषां सन्देशः प्रदत्तः।

गुरुनानकदेवस्य जन्म पञ्चदशशताब्द्यां १४६९ तमे वर्षे कार्तिकपूर्णिमायां पाकिस्तानदेशस्य पञ्जाबप्रान्ते तलवण्डी नामके ग्रामे अभवत्। अधुना तत् स्थानं ननकानासाहिब इति नाम्ना प्रसिद्धम् अस्ति। तस्य पितुः नाम मेहताकल्याणचन्दः आसीत्, यः मेहताकालू इति नाम्ना अपि प्रसिद्धः आसीत्। तस्य मातुः नाम तृप्तादेवी आसीत्। बाल्यकालादेव नानकः अत्यन्तं प्रतिभाशाली, शान्तस्वभावः, चिन्तनशीलः, धार्मिकवृत्तियुक्तः च आसीत्।

बालकः नानकः सांसारिकविषयेषु अधिकं रुचिं न प्रदर्शयति स्म। सः प्रायः ईश्वरचिन्तने, ध्यानधारणायां, साधुसङ्गतौ च समयं यापयति स्म। तस्य मनसि सर्वदा ईश्वरस्य स्वरूपं, जीवनस्य उद्देश्यं, मानवस्य कर्तव्यं च विषये जिज्ञासा भवति स्म। बाल्यावस्थायामेव तेन सत्यस्य, प्रेम्णः, सेवायाः च महत्त्वं ज्ञातम्।

गुरुनानकदेवस्य व्यक्तित्वस्य सर्वाधिकं महत्त्वपूर्णं वैशिष्ट्यम् आसीत् तस्य आध्यात्मिकचिन्तनम्। सः एकस्य निराकारस्य, सर्वशक्तिमतः, सर्वव्यापकस्य परमेश्वरस्य उपासनायाः उपदेशं दत्तवान्। तस्य मते ईश्वरः एकः एव अस्ति। सः सर्वेषु प्राणिषु विद्यमानः अस्ति तथा सर्वेषां जनानां सृष्टिकर्ता अस्ति।

तस्य प्रसिद्धः सिद्धान्तः अस्ति—

"एक ओंकार सतनाम "।

ੴ सतिनामु करता पुरखु निरभउ निरवैरु अकाल मूरति अजूनी सैभं गुर प्रसादि॥ अर्थात्

एक एव परमात्मा अस्ति। तस्य नाम सत्यम् अस्ति। सः सर्वस्य जगतः कर्ता अस्ति। सः निर्भयः, निर्वैरः, कालातीतः, निराकारः, अजन्मा, स्वयंभूः च अस्ति। तस्य प्राप्तिः सद्गुरोः प्रसादेन भवति।गुरुनानकदेवः बाह्याडम्बरस्य, अन्धविश्वासस्य, पाखण्डस्य च विरोधं कृतवान्। तस्य मते केवलं धार्मिकवेषधारणेन, तीर्थयात्रया, कर्मकाण्डैः वा मनुष्यः पवित्रः न भवति। अपितु शुद्धेन हृदयेन, सत्याचरणेन, परोपकारेण, ईश्वरभक्त्या च मानवजीवनं सफलं भवति।

गुरुनानकदेवस्य व्यक्तित्वे मानवतावादस्य भावना विशेषरूपेण दृश्यते। सः जातिभेदस्य, वर्णभेदस्य, उच्चनीचभावनायाः च प्रबलः विरोधी आसीत्। तस्य मते सर्वे मनुष्याः समानाः सन्ति, यतः सर्वेषाम् उत्पत्तिः एकस्मात् परमात्मनः एव भवति।सः कथयति स्म यत् कश्चित् मनुष्यः जात्या, धर्मेण, वर्णेन, धनेन वा महान् न भवति। मनुष्यस्य महानता तस्य सद्गुणेषु, सदाचारे, परोपकारे च निहिता अस्ति। तस्य शिक्षायां स्त्रीणाम् अपि विशेषः सम्मानः आसीत्। सः नारीणां सम्मानस्य, समानाधिकारस्य, सामाजिकप्रतिष्ठायाः च समर्थनं कृतवान्। तस्य विचाराः तत्कालीनसमाजस्य कृते अत्यन्तं क्रान्तिकारी आसन्।

गुरुनानकदेवः केवलम् आध्यात्मिकगुरुः नासीत्, अपितु महान् समाजसुधारकः अपि आसीत्। तेन समाजे प्रचलितानां कुरीतीनां, अन्धविश्वासानां, धार्मिकभेदभावानां च विरोधः कृतः।

सः जनान् शिक्षितवान् यत् मानवजीवनस्य वास्तविकं लक्ष्यं केवलं स्वार्थसाधनं न, अपितु समाजस्य कल्याणम् अपि अस्ति। सः परिश्रमस्य, ईमानदारीपूर्वकं धनार्जनस्य, दीनदुःखिनां सेवायाः च महत्त्वं प्रतिपादितवान्।

तस्य उपदेशेषु त्रयः प्रमुखाः सिद्धान्ताः सन्ति—

1\. नाम जपो — परमात्मनः नामस्मरणं कुरुत।

2\. किरत करो — ईमानदारीपूर्वकं परिश्रमं कृत्वा जीवनयापनं कुरुत।

3\. वण्ड छको — स्वस्य अर्जितसम्पत्तेः अन्नस्य च आवश्यकतावद्भिः सह विभाजनं कुरुत।

एते त्रयः सिद्धान्ताः मानवजीवनं नैतिकं, पवित्रं, सेवाभावयुक्तं च कुर्वन्ति।गुरुनानकदेवस्य व्यक्तित्वस्य अन्यत् महत्त्वपूर्णं वैशिष्ट्यं सेवाभावः आसीत्। तस्य मते मानवसेवा एव परमेश्वरसेवा अस्ति। सः निर्धनानां, असहायानां, दुःखितानां च सेवां परमं धर्मं मन्यते स्म।तेन सामूहिकभोजनस्य परम्परा प्रोत्साहिता, या अधुना 'लङ्गर' इति नाम्ना प्रसिद्धा अस्ति। लङ्गरव्यवस्थायां जाति-धर्म-वर्ण-सम्पत्ति-भेदं विना सर्वे जनाः एकत्र उपविश्य भोजनं कुर्वन्ति। अस्याः परम्परायाः मुख्योद्देश्यं सामाजिकसमानतायाः, भ्रातृत्वस्य, सेवाभावस्य च विकासः अस्ति।

अद्यापि विश्वस्य विभिन्नेषु गुरुद्वारेषु लङ्गरव्यवस्था प्रचलिता अस्ति। अनेन गुरुनानकदेवस्य मानवतावादी विचाराणां व्यापकता ज्ञायते।

उदारता तथा धार्मिकसहिष्णुता

गुरुनानकदेवः सर्वधर्मसमभावस्य समर्थकः आसीत्। सः हिन्दू-मुस्लिमयोः मध्ये प्रचलितस्य धार्मिकवैरस्य विरोधं कृतवान्। तस्य मते धर्मस्य वास्तविकं स्वरूपं प्रेम, सत्यं, दया, सेवा च अस्ति। मनुष्यः कस्यचित् धर्मस्य अनुयायी भवतु, किन्तु तस्य आचरणं पवित्रं भवेत्।सः विभिन्नेषु प्रदेशेषु यात्रां कृत्वा जनान् सद्भावस्य, शान्तेः, धार्मिकसहिष्णुतायाः च सन्देशं दत्तवान्। तस्य यात्राः 'उदासीनाः' इति नाम्ना प्रसिद्धाः सन्ति। एतासु यात्रासु सः अनेकैः सन्तैः, विद्वद्भिः, धार्मिकनेतृभिः च सह विचारविनिमयं कृतवान्।गुरुनानकदेवः महान् आध्यात्मिककविः अपि आसीत्। तेन रचितानि अनेकानि पदानि, भजनानि, श्लोकाः च जनानां हृदयेषु आध्यात्मिकभावनां जागरयन्ति। तस्य वाणी पञ्जाबीभाषायाः विविधरूपेषु तथा अन्यासु तत्कालीनलोकभाषासु अभिव्यक्ता अभवत्।

तस्य उपदेशाः सिक्खधर्मस्य पवित्रग्रन्थे 'श्रीगुरुग्रन्थसाहिबे' सङ्कलिताः सन्ति। अस्मिन् ग्रन्थे तस्य वाण्याः महत्त्वपूर्णं स्थानम् अस्ति। तस्य काव्येषु ईश्वरभक्तिः, मानवप्रेम, सत्यनिष्ठा, वैराग्यं, सदाचारः च प्रमुखतया प्रतिपादिताः सन्ति। गुरुनानकदेवस्य व्यक्तित्वे अनेकाः महान् गुणाः समन्विताः आसन्। सः सत्यवादी, दयालुः, विनम्रः, सहिष्णुः, परोपकारी, निर्भीकः च आसीत्। तस्य जीवनं सरलतायाः, पवित्रतायाः, त्यागस्य च आदर्शः आसीत्।

सः कदापि बाह्यसम्पत्तेः, पदप्रतिष्ठायाः, सांसारिकवैभवस्य च आकाङ्क्षां न कृतवान्। तस्य जीवनस्य मुख्योद्देश्यं मानवकल्याणम् आसीत्। सः स्वजीवने यानि आदर्शानि उपदिष्टवान्, तेषाम् आचरणम् अपि कृतवान्। अतः तस्य व्यक्तित्वं कथनी-करणयोः एकतायाः श्रेष्ठम् उदाहरणम् अस्ति। गुरुनानकदेवस्य निधनं १५३९ तमे वर्षे करतारपुरे अभवत्। तेन स्वजीवनस्य अन्तिमभागः करतारपुरे व्यतीतः। तत्र सः जनान् आध्यात्मिकजीवनस्य, सेवायाः, परिश्रमस्य, समानतायाः च उपदेशान् दत्तवान्। तेन स्वस्य उत्तराधिकारीरूपेण गुरुअङ्गददेवः नियुक्तः।तस्य उपदेशाः अद्यापि सम्पूर्णविश्वे श्रद्धया अनुस्रियन्ते। प्रतिवर्षं कार्तिकपूर्णिमायां तस्य जन्मजयन्ती 'गुरुपर्व' अथवा 'प्रकाशपर्व' इति नाम्ना महता उत्साहेन आचर्यते। इत्थं वयं वक्तुं शक्नुमो यत् गुरुनानकदेवस्य व्यक्तित्वं भारतीयसंस्कृतेः अमूल्यनिधिः अस्ति। सः केवलं सिक्खधर्मस्य प्रवर्तकः न, अपितु सम्पूर्णमानवजात्याः मार्गदर्शकः आसीत्। तस्य जीवनं प्रेम्णः, सत्यस्य, अहिंसायाः, समानतायाः, सेवायाः च साक्षात् प्रतीकम् अस्ति।

साम्प्रतौ यदा समाजे जातीयभेदभावः, धार्मिकवैरभावः, स्वार्थः, हिंसा च वर्धन्ते, तदा गुरुनानकदेवस्य उपदेशाः अधिकं प्रासङ्गिकाः भवन्ति। यदि वयं तस्य सिद्धान्तान् स्वजीवने आचरामः, तर्हि समाजे शान्तिः, एकता, भ्रातृत्वं, सुखं च अवश्यमेव वर्धिष्यन्ते।

अतः गुरुनानकदेवस्य व्यक्तित्वं मानवतायाः, आध्यात्मिकतायाः, सामाजिकसमरसतायाः च शाश्वतः आदर्शः इति वक्तुं शक्यते।

अन्ते च- गुरुनानकदेवाय नमो ज्ञानप्रदायिने।
विश्वबन्धुत्वदात्रे च, शान्तिदात्रे नमो नमः॥